ओ३म् नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च। नमो ब्रह्मसुताभ्यश् च पवित्राभ्यो नमोनमः॥

ओ३म् इरावती धेनुमती हि भूत६ सूयवसिनी मनवे दशस्या।
व्यस्कभ्ना रोदसी विष्णवे ते दाधर्थ पृथिवीमभितो मयूखैः स्वाहा॥ इति।

ततो ब्राह्मणमपि पूजयेत्—

ओ३म् आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतम् मर्त्यञ्च च।
हिरण्ययेन सविता रथेनाऽऽ देवो याति भुवनानि पश्यन्॥ इति।

---

३. *अनि गोनिष्क्रयद्रव्य (गाइ किन्ने मूल्यरूप दामपैसा) र पवित्र दुनामा राखेर पवित्रसहित गोनिष्क्रयद्रव्यलाइ गाइ मानेर "ओ३म् नमो गोभ्यः" इत्यादि मन्त्रहरुले जल-चन्दन-अक्षता-फूलहरुले पूजा गरेर ब्राह्मणलाइ पनि "ओ३म् आ कृष्णेन" इत्यादि मन्त्रले पूजा गरोस् (तिलक [टिको] लगाइदेओस्)।*

[४]ततो गोपुच्छजलेनाऽऽत्मानं शिरस्यभिषिञ्चेत्—

ओ३म् मनो मे तर्पयत वाचम् मे तर्पयत प्राणम् मे तर्पयत चक्षुर् मे तर्पयत श्रोत्रम् मे तर्पयताऽऽत्मानम् मे तर्पयत प्रजाम् मे तर्पयत पशून् मे तर्पयत गणान् मे तर्पयत गणा मे मा वितृषन्॥ इति।

[५]ततो दक्षिणहस्तेन कुशजलमादाय सपवित्रगोनिष्क्रयद्रव्यं स्पृष्ट्वा "ओ३म् ....शर्मा ....गोत्रः ....प्रवरो माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाध्यायी अहम् मम ज्ञाताऽज्ञात-सकृदसकृत्कृत-कामाऽकामकृत-पातकाऽनुपातकोपपातक-जातिभ्रंशकरपातक-सङ्करीकरणपातका-ऽपात्रीकरणपातक-मलिनीकरणपातकादि-सकल-कायिक-वाचिक-मानसिक-सांसर्गिकपातकानां निरसनेन देहशुद्ध्या करिष्यमाण-श्राद्धकर्माधिकारसिद्धये सर्वप्रायश्चित्तप्रत्याम्नायतया दीयमानम् एतद् गोनिष्क्रयद्रव्यं विष्णुदैवतम् ....शर्मणे ....गोत्राय सुपूजिताय ब्राह्मणाय तुभ्यं सम्प्रददे (कस्मै चन ब्राह्मणाय दातुमुत्सृज्ये) ओ३म् तत् सन् न मम" इत्युच्चार्य साग्रकुशखण्डजलम् ब्राह्मणहस्ते ददीत (जलयुतपत्रपात्रे मुञ्चेद् वा)।

---

४. *अनि गाइका पुच्छरका जलले (गोनिष्क्रयद्रव्यका पवित्रका जलले) "ओ३म् मनो मे तर्पयत" इत्यादि मन्त्रले आँफ्ना शिरमा अभिषेक गरोस्।*

५. *अनि दाइने हातले कुशजल लिएर पवित्रयुक्त गोनिष्क्रयद्रव्य (गाइ किन्ने मूल्य दामपैसा) छोएर "ओ३म् ...शर्मा" इत्यादि वाक्य पडेर कुशजल ब्राह्मणका हातमा देओस् (अथवा जलयुक्त पात्रमा [दुनामा, बोहोतामा] छोडोस्)।*

[६]ततः प्रार्थनां कुर्वीत–

ओ३म् यज्ञसाधनभूता गौर् विश्वस्याऽघप्रणाशिनी। तस्या मूल्यस्य दानेन प्रीयतां विश्वरूपधृत्॥ इति।

[७]ततो गोप्रार्थनां कुर्वीत–

ओ३म् कपिले सर्वदेवानां पूजनीयाऽसि रोहिणी। तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे॥ इति।

[८]ततो दक्षिणां ददीत (दानप्रतिष्ठां कुर्वीत)–

गोदानदक्षिणाद्रव्यं सजलसाग्रकुशखण्डमादाय "ओ३म् इहाऽद्य कृतस्य सर्वप्रायश्चित्तप्रत्याम्नायभूतस्य गोनिष्क्रयद्रव्यदानस्य प्रभावसम्पत्तेः सिद्धये दक्षिणात्वेन देयं नाणकद्रव्यं विष्णुदैवतम् .... शर्मणे ....गोत्राय सुपूजिताय ब्राह्मणाय दक्षिणात्वेन तुभ्यमहं सम्प्रददे (कस्मै चन ब्राह्मणाय दातुमुत्सृज्ये) ओ३म् तत् सन् न मम" इत्युच्चार्य ब्राह्मणाय ददीत (गोनिष्क्रयद्रव्यपात्रे निदध्याद् वा)।

---

६. *अनि "यज्ञसाधनभूता" इत्यादि मन्त्रले विश्वरूपधारिको प्रीतिको प्रार्थना गरोस्।*

७. *अनि गाइको पनि "कपिले सर्वदेवानाम्" इत्यादि मन्त्रले प्रार्थना गरोस्।*

८. *अनि कुशजलसहित दक्षिणाद्रव्य (गोदानप्रतिष्ठाद्रव्य) लिएर "ओ३म् इहाद्य कृतस्य" इत्यादि उच्चारण गरेर गोदानदक्षिणा देओस् (दानप्रतिष्ठा गरोस्)।*

[९]ब्राह्मणश् च–

ओ३म् द्यौस् त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु। देवस्य त्वा सवितुः प्रसवेऽश्विनोर् बाहुभ्याम् पूष्णो हस्ताभ्याम्। विष्णवे गोनिष्क्रय-द्रव्यम् प्रतिगृह्णामि। ओ३म् स्वस्ति। इति गोनिष्क्रयद्रव्यं प्रतिगृह्णीयात्।

[१०]ततो ब्राह्मणः कामस्तुतिं पठेत्–

ओ३म् कोऽदात् कस्माऽ अदात् कामोऽदात् कामायाऽदात्। कामो दाता कामः प्रतिग्रहीता कामैतत् ते। इति।

[११]ततो ब्राह्मणो गोपुच्छोदकेन यजमानमभिषिञ्चेत्–

ओ३म् द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर् विश्वे देवाः शान्तिर् ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि॥ इति।)

---

९. *अनि ब्राह्मणले "ओ३म् द्यौस् त्वा" इत्यादि मन्त्र पडेर दान स्वीकार गरुन्।*

१०. *अनि ब्राह्मणले "ओ३म् कोऽदात्" इत्यादि कामस्तुति पढुन्।*

११. *अनि ब्राह्मणले गोपुच्छका (कुशपवित्रका) जलले "ओ३म् द्यौः शान्तिः" इत्यादि मन्त्रले यजमानको अभिषेक गरुन्।*

[१२](अथ तर्पणम्)[%] —

तत्रादौ कर्ता प्राङ्मुख **उपवीत्येव** कुशजलमादाय "ओ३म्। तत् सत् स्वस्ति। एतस्मिन् ब्रह्माण्डे भूर्लोके भूमण्डले जम्बूद्वीपे भारतवर्षे कर्मभूमौ कुमारिकाखण्डे आर्यावर्तान्तर्गते हिमालयदक्षिण-पार्श्वस्थे विष्णुप्रजापतिक्षेत्रान्तर्गते गण्डकीप्रदेशे ....ग्रामे [नगरे] इह पुण्यदेशे नभस्ये मासे कृष्णे पक्षे षष्ठ्यां तिथौ अद्य ....शर्मा ....गोत्रः ....प्रवरो माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-शाखाध्यायी कात्यायन-त्रिकण्डिक-स्नानसूत्रानुसारी अहं परमात्मप्रसादाय नित्यब्रह्मयज्ञकर्माङ्गत्वेन देवादि-दिव्यमनुष्य-दिव्यपितृ-(यम)-स्वपितृतर्पणं ब्रह्माद्यर्चनादिकं च करिष्ये" इति सङ्कल्पयेत्।

[१३]तत **उपवीत्येव** प्राङ्मुखः पातितदक्षिणजानुः ("ओ३म् विश्वे देवास आगत शृणुता मऽ इमᳪ हवम्। एदम् बर्हिर् निषीदत॥ ओ३म् विश्वे देवाः शृणुतेमᳪ हवम् मे खेऽ अन्तरिक्षे खऽ उप द्यवि ष्ठ। खेऽ

---

१२. ***अब तर्पणपद्धति देखाइन्छ।*** *तेसमा पैलेइ कर्ताले पूर्व फर्केर देउरे काँदमा नै जनै र उपर्ना रहन दिएरै (उपवीति [सव्य] नै रएर) कुश-जल लिएर सङ्कल्प गरोस्।*

% *तर्पणका विषयमा भन्न पर्ने धेरै कुरा भूमिकामा लेखिएका छन्। ति तिँहिँ हेर्नुहोला।*

१३. *अनि देउरे काँदमा नै जनै र उपर्ना राखेरै (सव्य रएरै) पूर्वतिरै फर्केर दाइने घुँडो पृथिवीसंलग्न गरेर [दाइने घुँडो मारेर] (विश्वेदेवको आवाहन गरेर) दाइने हत्केलाका पछाडिपट्टि हत्केलो जोडिएका वामहस्तले युक्त भएको दक्षिणहस्तरूप अञ्जलिले*

अग्निजिह्वाऽ उत वा यजत्राऽ आसद्याऽस्मिन् बर्हिषि मादयध्वम्" इति मन्त्रद्वयं पठित्वा। "ओ३म् भूर् भुवः स्वः ब्रह्मादयो देवा इहाऽऽगच्छन्तु इह तिष्ठन्तु गृह्णन्त्वेतानुदकाञ्जलीन्" इत्यावाह्य) एकस्माद् आयत-मुखात् ताम्रपात्रात् पृष्ठसंलग्नवामकरयुतदक्षिणकरकृतेन अङ्गुष्ठनिपीडितप्रागग्रकुशत्रयवता अञ्जलिना उदकं गृह्णन् अन्यस्मिन् आयतमुखे ताम्रपात्रे उदकं पातयन् देवतीर्थेन उदकं पूर्वतः क्षिपन् कुशाग्रपातिते-नोदकेन ब्रह्मादीन् देवादींस् तर्पयेत्—

ओ३म् ब्रह्मा तृप्यताम्, ओ३म् विष्णुस् तृप्यताम्, ओ३म् रुद्रस् तृप्यताम्, (ततो दक्षिणहस्तेनाऽप उपस्पृशेत्, ततः), ओ३म् प्रजापतिस् तृप्यताम्, ओ३म् देवास् तृप्यन्ताम्, ओ३म् छन्दाꣳसि तृप्यन्ताम्, ओ३म् वेदास् तृप्यन्ताम्, ओ३म् ऋषयस् तृप्यन्ताम्, ओ३म् पुराणाऽऽचार्यास् तृप्यन्ताम्, ओ३म् गन्धर्वास् तृप्यन्ताम्, ओ३म् इतराऽऽचार्यास् तृप्यन्ताम्, ओ३म् संव्वत्सरः सावयवस् तृप्यताम्, ओ३म् देव्यस् तृप्यन्ताम्, ओ३म् अप्सरसस् तृप्यन्ताम्, ओ३म् देवाऽनुगास् तृप्यन्ताम्, ओ३म् नागास् तृप्यन्ताम्, ओ३म् सागरास् तृप्यन्ताम्, ओ३म् पर्वतास् तृप्यन्ताम्, ओ३म् सरितस् तृप्यन्ताम्, ओ३म् मनुष्यास् तृप्यन्ताम्,

---

बुडि उम्लाले थिचेर अड्याइएका पूर्वतिर टुप्पो फर्काइएका तिन कुश लिएर एउटा फराकिलो मुख भएको तामाको पात्रबाट जल लिंदै देवतीर्थले कुशको टुप्पाबाट पूर्वतिर जल हुत्त्याउँदै तृप्यताम् तृप्यन्ताम् भनेभनेका वेलामा आर्को फराकिलो मुख भएको तामाको पात्रमा जल खसाउँदै जलले ब्रह्मादि देवतादिको तर्पण गरोस्।

ओ३म् यक्षास् तृप्यन्ताम्, ओ३म् रक्षाᳪसि तृप्यन्ताम्, ओ३म् पिशाचास् तृप्यन्ताम्, (ततो दक्षिणहस्तेनाऽप उपस्पृशेत्, ततः) ओ३म् सुपर्णास् तृप्यन्ताम्, ओ३म् भूतानि तृप्यन्ताम्, (ततो दक्षिणहस्तेनाऽप उपस्पृशेत्, ततः) ओ३म् पशवस् तृप्यन्ताम्, ओ३म् वनस्पतयस् तृप्यन्ताम्, ओ३म् ओषधयस् तृप्यन्ताम्, ओ३म् भूतग्रामश् चतुर्विधस् तृप्यताम् *(ओ३म् मरीचिस् तृप्यताम्, ओ३म् अत्रिस् तृप्यताम्, ओ३म् अङ्गिरास् तृप्यताम्, ओ३म् पुलस्त्यस् तृप्यताम्, ओ३म् पुलहस् तृप्यताम्, ओ३म् क्रतुस् तृप्यताम्, ओ३म् प्रचेतास् तृप्यताम्, ओ३म् वसिष्ठस् तृप्यताम्, ओ३म् भृगुस् तृप्यताम्, ओ३म् नारदस् तृप्यताम्)* इति।

[१४]तत उदङ्मुखो **निवीती** उपस्थं कृत्वा समजानुः *("ओ३म् भूर् भुवः स्वः सनकादयः सप्त दिव्यमनुष्या इहाऽऽगच्छन्त्विह तिष्ठन्तु गृह्णन्त्वेतानुदकाञ्जलीन्" इत्यावाह्य)* अञ्जलौ मध्ये भुग्नान् कुशान् अङ्गुष्ठनिपीडितान् कृत्वा कायतीर्थेन उदकमुत्तरतः क्षिपन् कुशमध्यपातितेनोदकेन सनकादिदिव्यमनुष्याँस् तपर्ययेत्—

---

१४. *अनि उत्तरतिर फर्केर जनै र उपर्ना दुवै काँदमा पारेर मालाजस्तो बनाइ पन्थ मारेर दुवै घुँडा भूमिसंलग्न गराइ समानरूपमा राखेर (सनकादिको आवाहन गरेर) पूर्वोक्त प्रकारका अञ्जलिमा कुश दोब्र्याएर कुशका मध्यभाग काञ्छिउम्लापट्टि पारेर बुडि उम्लाले थिचेर एउटा तामाका भाँडाबाट जल लिएर प्राजापत्य तीर्थले कुशका मध्यबाट तृप्यताम् भनेभनेका वेलामा उत्तरतिर हुत्त्याउँदै आर्का तामाका भाँडामा खसालिएका जलले सनकादि दिव्यमनुष्यहरुलाइ तर्पणगरोस्।*

ओ३म् सनकस् तृप्यताम्, ओ३म् सनन्दनस् तृप्यताम्, ओ३म् सनातनस् तृप्यताम्, ओ३म् कपिलस् तृप्यताम्, ओ३म् आसुरिस् तृप्यताम्, ओ३म् वोढुस् तृप्यताम्, ओ३म् पञ्चशिखस् तृप्यताम्। इति।

[१५]ततो दक्षिणाऽभिमुखः **प्राचीनावीती** पातितवामजानुः *("ओ३म् उशन्तस् त्वा निधीमह्युशन्तः समिधीमहि। उशन्नुशतऽ आवह पितॄन् हविषेऽ अत्तवे॥ ओ३म् आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर् देवयानैः। अस्मिन् यज्ञे स्वधया मदन्तोऽधि ब्रुवन्तु तेऽवन्त्वस्मान्" इति मन्त्रद्वयं पठित्वा "ओ३म् कव्यवाडनलादयो दिव्यपितर इहाऽऽगच्छन्तु इह तिष्ठन्तु गृह्णन्त्वेतानुदकाञ्जलीन्" इत्यावाह्य)* अञ्जलौ मध्ये भुग्नान् कुशान् अङ्गुष्ठनिपीडितान् कृत्वा पितृतीर्थेन उदकं दक्षिणतः क्षिपन् कुशाग्रकुशमूल-पातितेन तिलमिश्रोदकेन कव्यवाडनलादिदिव्यपितॄंस् तर्पयेत्—

ओ३म् कव्यवाडनलस् तृप्यतामेतत् तस्मा उदकं स्वधा नमः, ओ३म् सोमस् तृप्यतामेतत् तस्मा उदकं स्वधा नमः, ओ३म् यमस् तृप्यतामेतत् तस्मा उदकं स्वधा नमः, ओ३म् अर्यमा तृप्यतामेतत् तस्मा उदकं

---

१५. *अनि दक्षिणतिर फर्केर दाइने काँदमा जनै र उपर्ना पारेर (अपसव्य भएर) देउरे घुँडो भूमिसंलग्न गराएर [देउरे घुँडो मारेर] (कव्यवाडनलादिको आवाहन गरेर) पूर्वोक्त प्रकारका अञ्जलिमा माजामा दोब्र्याइएका कुशका टुप्पा र फेद पितृतीर्थतिर पारेर बुडि उम्लाले थिचेर एउटा तामाका भाँडाबाट जल लिएर पितृतीर्थले कुशका टुप्पा र फेदबाट स्वधा नमः भनेभनेका वेलामा दक्षिणतिर हुत्त्याउँदै आर्का तामाका भाँडामा खसालिएका तिलमिस्सिएका जलले कव्यवाडनलादि दिव्यपितृहरुलाइ तर्पणगरोस्।*

स्वधा नमः, ओ३म् पितरोऽग्निष्वात्तास् तृप्यन्तामेतत् तेभ्य उदकं स्वधा नमः, ओ३म् पितरो बर्हिषदस् तृप्यन्तामेतत् तेभ्य उदकं स्वधा नमः, ओ३म् पितरः सोमपास् तृप्यन्तामेतत् तेभ्य उदकं स्वधा नमः।

[१६]*(ततस् तथैव यावज्जीवकृतपापनाशकामश् चतुर्दश यमान् नमोऽन्तैर् नाममन्त्रैस् त्रिभिस्-त्रिभिस् तिलमिश्रोदकाञ्जलिभिस् तर्पयेत्—*

ओ३म् यमाय नमः ३, ओ३म् धर्मराजाय नमः ३, ओ३म् मृत्यवे नमः ३, ओ३म् अन्तकाय नमः ३, ओ३म् वैवस्वताय नमः ३, ओ३म् कालाय नमः ३, ओ३म् सर्वभूतक्षयाय नमः ३, ओ३म् औदुम्बराय नमः ३, ओ३म् दध्नाय नमः ३, ओ३म् नीलाय नमः ३, ओ३म् परमेष्ठिने नमः ३, ओ३म् वृकोदराय नमः ३, ओ३म् चित्राय नमः ३, ओ३म् चित्रगुप्ताय नमः ३ इति)

[१७]ततस् तथैव (आगच्छन्तु मे पितर इमान् गृह्णन्तूदकाऽञ्जलीन् इत्यावाह्य) स्वपितॄँस् तर्पयेत्—

---

१६. *अनि तेसै गरेर नमःशब्द अन्त्यमा भएका नाममन्त्रहरुले (अर्थात् "ओ३म् यमाय नमः" इत्यादि मन्त्रहरुले) चौद यमहरुलाइ तिलमिस्सिएका जलका तिनतिन अञ्जलिले तर्पणगरोस्।*

१७. *अनि तेसै गरि (आँफ्ना पितृको आवाहन गरेर) आँफ्ना पितृहरुलाइ "ओ३म् अस्मत्पिता" इत्यादि मन्त्रहरुले (अमुकशर्मा भनेका ठाममा नामको तथा अमुकगोत्र भनेका ठाममा गोत्रको उच्चारण गर्दै) तिलमिस्सिएका जलका तिनतिन अञ्जलिले तर्पणगरोस्।*

ओ३म् अस्मत्पिता अमुकशर्मा अमुकगोत्रो वसुस्वरूपस् तृप्यतामेतत् तस्मा उदकं स्वधा नमः ३।

ओ३म् अस्मत्पितामहः अमुकशर्मा अमुकगोत्रो रुद्रस्वरूपस् तृप्यतामेतत् तस्मा उदकं स्वधा नमः ३।

ओ३म् अस्मत्प्रपितामहः अमुकशर्मा अमुकगोत्र आदित्यस्वरूपस्तृप्यतामेतत् तस्मा उदकं स्वधा नमः ३।

(ओ३म् अस्मन्माता अमुकी शर्मा [देवी] अमुकगोत्रा वसुस्वरूपा तृप्यतामेतत् तस्या उदकं स्वधा नमः ३।

ओ३म् अस्मत्पितामही अमुकी शर्मा [देवी] अमुकगोत्रा रुद्रस्वरूपा तृप्यतामेतत् तस्या उदकं स्वधा नमः ३।

ओ३म् अस्मत्प्रपितामही अमुकी शर्मा [देवी] अमुकगोत्रा आदित्यस्वरूपा तृप्यतामेतत् तस्या उदकं स्वधा नमः ३।

ओ३म् अस्मत्सपत्नमाता अमुकी शर्मा [देवी] अमुकगोत्रा वसुस्वरूपा तृप्यतामेतत् तस्या उदकं स्वधा नमः ३।) इति।

[१८]तत उदीरतामित्यादिकान् नव मन्त्रान् तृप्यध्वमिति च पठन् पितृतीर्थेन निरन्तरं जलं पातयन् प्रसिञ्चेत्—

---

१८. *अनि अर्घौतामा जल लिएर "ओ३म् उदीरताम्" इत्यादि मन्त्र पढ्दै पितृतीर्थतिरबाट निरन्तर जलको धारो खसाल्दै प्रसेचनकर्म गरोस्।*

ओ३म् उदीरतामवरऽ उत् परासऽ उन् मध्यमाः पितरः सोम्यासः। असुंय् यऽ ईयुरवृकाऽ ऋतज्ञास् ते नोऽवन्तु पितरो हवेषु॥ अङ्गिरसो नः पितरो नवग्वाऽ अथर्वाणो भृगवः सोम्यासः। तेषांव् वयꣳ सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम॥ आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर् देवयानैः। अस्मिन् यज्ञे स्वधया मदन्तोऽधिब्रुवन्तु तेऽवन्त्वस्मान्॥ ऊर्जंव् वहन्तीरमृतङ् घृतम् पयः कीलालम् परिस्रुतम्। स्वधा स्थ तर्पयत मे पितॄन्॥ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः। अक्षन् पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरः पितरः शुन्धध्वम्॥ ये चेह पितरो ये च नेह याँश् च विद्म याꣳ२॥ऽ उ च न प्रविद्म। त्वंव् वेत्थ यति ते जातवेदः स्वधाभिर् यज्ञꣳ सुकृतञ् जुषस्व॥ मधु वाताऽ ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर् नः सन्त्वोषधीः॥ मधु नक्तमुतोषसो मधुमत् पार्थिवꣳ रजः। मधु द्यौरस्तु नः पिता॥ मधुमान् नो वनस्पतिर् मधुमाꣳ२॥ऽ अस्तु सूर्यः। माध्वीर् गावो भवन्तु नः॥ ओ३म् तृप्यध्वम्। तृप्यध्वम्। तृप्यध्वम्। इति।

[१९]ततो नमो व इत्यादीनि यजूंषि सकृद् ब्रूयात्—

ओ३म् नमो वः पितरो रसाय। नमो वः पितरः शोषाय। नमो वः पितरो जीवाय। नमो वः पितरः

---

१९. *अनि "ओ३म् नमो वः" इत्यादि यजुहरु एकपल्ट भनोस्।*

स्वधायै। नमो वः पितरो घोराय। नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वः। गृहान् नः पितरो दत्त सतो वः पितरो देष्म। इति।

[२०]ततो मातामहाँस् तर्पयेत्—

ओ३म् अस्मन्मातामहः अमुकशर्मा अमुकगोत्रो वसुस्वरूपस् तृप्यतामेतत् तस्मा उदकं स्वधा नमः ३।

ओ३म् अस्मत्प्रमातामहः अमुकशर्मा अमुकगोत्रो रुद्रस्वरूपस् तृप्यतामेतत् तस्मा उदकं स्वधा नमः ३।

ओ३म् अस्मद्वृद्धप्रमातामहः अमुकशर्मा अमुकगोत्र आदित्यस्वरूपस्तृप्यतामेतत् तस्मा उदकं स्वधा नमः ३।

(ओ३म् अस्मन्मातामही अमुकी शर्मा [देवी] अमुकगोत्रा वसुस्वरूपा तृप्यतामेतत् तस्या उदकं स्वधा नमः ३।

ओ३म् अस्मत्प्रमातामही अमुकी शर्मा [देवी] अमुकगोत्रा रुद्रस्वरूपा तृप्यतामेतत् तस्या उदकं स्वधा नमः ३।

ओ३म् अस्मद्वृद्धप्रमातामही अमुकी शर्मा [देवी] अमुकगोत्रा आदित्यस्वरूपा तृप्यतामेतत् तस्या उदक स्वधा नमः ३।) इति।

---

२०. *अनि "ओ३म् अस्मन्मातामहः" इत्यादि मन्त्रहरुले तिलमिस्सिएका जलका तिनतिन अञ्जलिले मातामहादिलाइ (मावलिपट्टिका जिबाउ-बुडाजिबाउ-खुडाजिबाउलाइ) नाम-गोत्र-स्वरूपको उल्लेख गर्दै तर्पणगरोस्।*

[२१]ततो यस्य येऽन्येऽपि तर्पणीयाः सन्ति तानपि अधोनिर्दिष्टक्रमानुसारं त्रिभिस्-त्रिभिस् तिल-मिश्रोदकाञ्जलिभिस् तर्पयेत्—

१. ओ३म् अस्मदाचार्यः [अस्मदुपाध्यायः] अमुकशर्मा अमुकगोत्रो वसुस्वरूपस् तृप्यतामेतत् तस्मा उदकं स्वधा नमः।

२. ओ३म् अस्मद्विद्यागुरुः अमुकशर्मा अमुकगोत्रो वसुस्वरूपस् तृप्यतामेतत् तस्मा उदकं स्वधा नमः।

३. ओ३म् अस्मच्छिष्यः अमुकशर्मा अमुकगोत्रो वसुस्वरूपस् तृप्यतामेतत् तस्मा उदकं स्वधा नमः।

४. ओ३म् अस्मदृत्विग् अमुकशर्मा अमुकगोत्रो वसुस्वरूपस् तृप्यतामेतत् तस्मा उदकं स्वधा नमः।

५. ओ३म् अस्मत्पत्नी अमुकी शर्मा [देवी] अमुकगोत्रा वसुस्वरूपा तृप्यतामेतत् तस्या उदकं स्वधा नमः।

६. ओ३म् अस्मत्पुत्रः अमुकशर्मा अमुकगोत्रो वसुस्वरूपस् तृप्यतामेतत् तस्मा उदकं स्वधा नमः।

७. ओ३म् अस्मज्[त्]ज्येष्ठ[कनिष्ठ-]भ्राता अमुकशर्मा अमुकगोत्रो वसुस्वरूपस् तृप्यतामेतत् तस्मा उदकं स्वधा नमः।

८. ओ३म् अस्मत्सापत्नज्येष्ठ-[कनिष्ठ]भ्राता अमुकशर्मा अमुकगोत्रो वसुस्वरूपस् तृप्यतामेतत् तस्मा उदकं स्वधा नमः।

९. ओ३म् अस्मज्[त्]ज्येष्ठ-[कनिष्ठ]पितृव्यः अमुकशर्मा अमुकगोत्रो वसुस्वरूपस् तृप्यतामेतत् तस्मा उदकं स्वधा नमः।

---

२१. *अनि जसका अरु जोजो तर्पण दिन पर्ने पितृ छन् तिनलाइ पनि (तिनतिन अञ्जलिले नै) तर्पणगरोस्। (यो क्रम माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाको कातीयस्नानसूत्रको हो, एस क्रमका विषयमा एसै ग्रन्थका भूमिकामा लेखिसकिएको छ)।*

१०. ओ३म् अस्मत्सापत्नज्येष्ठ[कनिष्ठ]पितृव्यः अमुकशर्मा अमुकगोत्रो वसुस्वरूपस्तृप्यतामेतत् तस्मा उदकं स्वधा नमः।

११. ओ३म् अस्मच्छ्वशुरः अमुकशर्मा अमुकगोत्रो वसुस्वरूपस् तृप्यतामेतत् तस्मा उदकं स्वधा नमः।

१२. ओ३म् अस्मज्[त्]ज्येष्ठ[कनिष्ठ]मातुलः अमुकशर्मा अमुकगोत्रो वसुस्वरूपस् तृप्यतामेतत् तस्मा उदकं स्वधा नमः।

१३. ओ३म् अस्मत्सापत्नज्येष्ठ[कनिष्ठ]मातुलः अमुकशर्मा अमुकगोत्रो वसुस्वरूपस् तृप्यतामेतत् तस्मा उदकं स्वधा नमः।

१४. ओ३म् अस्मत्पुत्री अमुकी शर्मा [देवी] अमुकगोत्रा वसुस्वरूपा तृप्यतामेतत् तस्या उदकं स्वधा नमः।

१५. ओ३म् अस्मज्[त्]ज्येष्ठ[कनिष्ठ]स्वसा अमुकी शर्मा [देवी] अमुकगोत्रा वसुस्वरूपा तृप्यतामेतत् तस्या उदकं स्वधा नमः।

१६. ओ३म् अस्मत्सापत्नज्येष्ठ[कनिष्ठ]स्वसा अमुकी शर्मा [देवी] अमुकगोत्रा वसुस्वरूपा तृप्यतामेतत् तस्या उदकं स्वधा नमः।

१७. ओ३म् अस्मज्[त्]ज्येष्ठ[कनिष्ठ]पितृष्वसा अमुकी शर्मा [देवी] अमुकगोत्रा वसुस्वरूपा तृप्यतामेतत् तस्या उदकं स्वधा नमः।

१८. ओ३म् अस्मत्सापत्नज्येष्ठ[कनिष्ठ]पितृष्वसा अमुकी शर्मा [देवी] अमुकगोत्रा वसुस्वरूपा तृप्यतामेतत् तस्या उदकं स्वधा नमः।

१९. ओ३म् अस्मज्[त्]ज्येष्ठ[कनिष्ठ]मातृष्वसा अमुकी शर्मा [देवी] अमुकगोत्रा वसुस्वरूपा तृप्यतामेतत् तस्या उदकं स्वधा नमः।

२०. ओ३म् अस्मत्सापत्नज्येष्ठ[कनिष्ठ]मातृष्वसा अमुकी शर्मा [देवी] अमुकगोत्रा वसुस्वरूपा तृप्यतामेतत् तस्या उदकं स्वधा नमः।

२१. ओ३म् अस्मद्भागिनेयः अमुकशर्मा अमुकगोत्रो वसुस्वरूपस् तृप्यतामेतत् तस्मा उदकं स्वधा नमः।

२२. ओ३म् अस्मत्सखः अमुकशर्मा अमुकगोत्रो वसुस्वरूपस् तृप्यतामेतत् तस्मा उदकं स्वधा नमः।

२३. ओ३म् अस्मदाप्तः अमुकशर्मा अमुकगोत्रो वसुस्वरूपस् तृप्यतामेतत् तस्मा उदकं स्वधा नमः। इति।

[२२](ततः पितृतीर्थेन धारारूपेण उदकं पातयँस् तर्पयेत्–

ओ३म् आब्रह्म स्तम्बपर्यन्तं देवर्षिपितृमानवाः। तृप्यन्तु पितरः सर्वे मातृमातामहादयः॥ पितृवंशे मृता ये च मातृवंशे तथैव च। गुरुश्वशुरबन्धूनां ये चाऽन्ये बान्धवा मृताः॥ ते तृप्तिमखिला यान्तु ये चाऽस्मत् तोयकाङ्क्षिणः। येऽबान्धवा बान्धवा वा येऽन्यजन्मनि बान्धवाः॥ ते सर्वे तृप्तिमायान्तु मद्दत्तेनाऽम्बुनाऽखिलाः। देवाऽसुरास् तथा यक्षा नागा गन्धर्वराक्षसाः॥ पिशाचा गुह्यकाः सिद्धाः कूष्माण्डास् तथा खगाः। जलेचरा भूमिचरा वाय्वाहाराश् च जन्तवः॥ ते तृप्तिमखिला यान्तु मद्दत्तेनाऽम्बुनाऽखिलाः। नरकेषु समस्तेषु यातनासु च ये स्थिताः। तेषामाप्यायनायैतद् दीयते सलिलं मया॥ अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम्। आ ब्रह्मभुवनाल् लोकादिदमस्तु तिलोदकम्। यत्रक्वचनसंस्थानां क्षुतत्तृष्णोपहतात्मनाम्। इदमक्षय्यमेवाऽस्तु मया दत्तं तिलोदकम्॥ इति)

[२३]ततो वासो निष्पीडयेत् *(ओ३म् ये के चाऽस्मत्कुले जाता अपुत्रा गोत्रिणो मृताः। ते पिबन्तु मया दत्तं वस्त्रनिष्पीडितोदकम्॥ इति)*।

---

२२. *अनि पितृतीर्थबाट पाँनिको धारो खसाल्दै "ओ३म्। आब्रह्म स्तम्बपर्यन्तम्" इत्यादि मन्त्रले तर्पण गरोस्।*

२३. *अनि स्नान गर्दा लगाएको भिजेको वस्त्र उल्टो बटारि भैंमा निचरोस् (अथवा जनै भिजाएर उल्टो बटारि भैंमा निचरोस्)।*

[२४]ततः प्राङ्मुख **उपवीती** आचम्य पुटाञ्जलिं कुर्वाणस् तल्लिङ्गैर् मन्त्रैर् ब्रह्मादीन् अर्चयेत् (स्तुवीत)–

ओ३म् ब्रह्म जज्ञानम् प्रथमम् पुरस्ताद् वि सीमतः सुरुचो वेनऽ आवः। स बुध्न्याऽ उपमाऽ अस्य विष्ठाः सतश् च योनिमसतश् च वि वः॥ *(ओ३म् ब्रह्मणे नमः)*।

ओ३म् इदंव् विष्णुर् विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पाँसुरे॥ *(ओ३म् विष्णवे नमः)*।

ओ३म् नमस् ते रुद्र मन्यवऽ उतो तऽ इषवे नमः। बाहुभ्यामुत ते नमः॥ *(ओ३म् रुद्राय नमः)* (ततो दक्षिणहस्तेनोदकं स्पृशेत्, ततः)।

ओ३म् तत् सवितुर् वरेण्यम् भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥ *(ओ३म् सवित्रे नमः)*।

ओ३म् मित्रस्य चर्षणीधृतोऽवो देवस्य सानसि। द्युम्नञ् चित्रश्रवस्तमम्॥ *(ओ३म् मित्राय नमः)*।

ओ३म् इमम् मे वरुण श्रुधी हवमद्या च मृडय। त्वामवस्युराचके॥ *(ओ३म् वरुणाय नमः)*॥ इति।

---

२४. *अनि पूर्वतिर फर्केर देउरे काँदमा जनै र उपर्ना पारेर (सव्य भएर) दाइने हात खुला गरि आचमन गरेर सम्पुटाकार अञ्जलि गराउँदै तिति देवताका लिङ्ग (सङ्केत) भएका मन्त्रहरुले ब्रह्मा, विष्णु, रुद्र, सविता, मित्र र वरुण इ वैदिक देवताहरुको स्तुति गरोस्।*

[२५] *(तत उत्थाय सूर्यायाऽर्घं ददीत– "ओ३म् एहि सूर्य सहस्रांशो तेजोराशे जगत्पते। अनुकम्पय मां भक्त्या गृहाणाऽर्घं दिवाकर" इति)।*

[२६] तत उत्तिष्ठन् सूर्यमुपतिष्ठेत– "ओ३म् अदृश्रमस्य केतवो विरश्मयो जनाः॥ॅऽ अनु। भ्राजन्तोऽ अग्नयो यथा। *(उपयामगृहीतोसि सूर्याय त्वा भ्राजायैष ते योनिः सूर्याय त्वा भ्राजाय। सूर्य भ्राजिष्ठ भ्राजिष्ठस् त्वन् देवेष्वसि भ्राजिष्ठोऽहम् मनुष्येषु भूयासम्॥)* हँ्सः शुचिषद् वसुरन्तरिक्षसद् धोता वेदिषदतिथिर् दुरोणसत्। नृषद् वरसदृतसद् व्योमसदब्जा गोजाऽ ऋतजाऽ अद्रिजाऽ ऋतम् बृहत्" इति।

[२७] ततः सूर्यं प्रदक्षिणीकृत्य उत्तिष्ठन्नेव तांतां दिशं प्रत्यावर्तमानो दिशो दिग्देवताश्च नमस्कुर्वीत–

---

२५. *अनि उठेर सूर्यलाइ "ओ३म् एहि सूर्य" इत्यादि मन्त्रले अर्घ देओस्।*

२६. *अनि उठ्तो छँदो "ओ३म् अदृश्रमस्य" इत्यादि ऋचाहरुले सूर्यको उपस्थान गरोस्।*

२७. *अनि सूर्यको प्रदक्षिणा गरेर उठेरै (नमोऽन्त नाममन्त्रहरुले [अन्तमा नमःशब्दको प्रयोग भएका देवतानामरूप मन्त्रहरूले]) दिशाहरुलाइ र दिशाका देवताहरुलाइ नमस्कारगरोस्।*

ओ३म् प्राच्यै दिशे नमः। ओ३म् आदित्याय नमः। *(ओ३म् आग्नेय्यै दिशे नमः। ओ३म् अग्नये नमः।)* ओ३म् दक्षिणायै दिशे नमः। ओ३म् यमाय नमः। *(ओ३म् नैर्ऋत्यै दिशे नमः। ओ३म् निर्ऋतये नमः। ओ३म् विष्णवे नमः।)* ओ३म् प्रतीच्यै दिशे नमः। ओ३म् वरुणाय नमः। *(ओ३म् वायव्यायै दिशे नमः। ओ३म् वायवे नमः।)* ओ३म् उदीच्यै दिशे नमः। ओ३म् सोमाय नमः। *(ओ३म् ऐशान्यै दिशे नमः। ओ३म् ईशानाय नमः। ओ३म् विष्णवे नमः।)* ओ३म् ऊर्ध्वायै दिशे नमः। ओ३म् अग्नये नमः। ओ३म् अवाच्यै दिशे नमः। ओ३म् अनन्ताय नमः। इति।

[२८]ततः प्राङ्मुख उपविश्य ब्रह्मादीन् नमस्कुर्वीत—

ओ३म् ब्रह्मणे नमः। ओ३म् अग्नये नमः। ओ३म् पृथिव्यै नमः। ओ३म् ओषधिभ्यो नमः।
ओ३म् वाचे नमः। ओ३म् वाचस्पतये नमः। ओ३म् विष्णवे महते नमः। ओ३म् अद्भ्यो नमः।
ओ३म् अपाम्पतये नमः। ओ३म् वरुणाय नमः। इति।

---

२८. *अनि पूर्वतिर फर्केर बसि ब्रह्मादिलाइ नमोऽन्त (अन्तमा नमःशब्दको प्रयोग भएका) नाममन्त्रले नमस्कारगरोस्।*

[२९]ततः संव् वर्चसेति मुखं विमृज्यात्–

ओ३म् संव् वर्चसा पयसा सन् तनूभिरगन्महि मनसा सꣳ शिवेन।
त्वष्टा सुदत्रो वि दधातु रायोऽनु मार्ष्टु तन्वो यद् द्विलिष्टम्॥

[३०]*(ततोऽनामिकाङ्गुष्ठाभ्यां जलं स्पृष्ट्वा ताभ्यां तच् चक्षुरिति मन्त्रेण चक्षुषी स्पृशेत्–*

ओ३म् तच् चक्षुर् देवहितम् पुरस्ताच् छुक्रमुच्चरत्। पश्येम शरदः शतञ् जीवेम शरदः शतꣳ शृणुयाम शरदः शतम् प्र ब्रवाम शरदः शतमदीनाः स्याम शरदः शतम् भूयश् च शरदः शतात्॥ इति।)

[३१]ततो देवागातुविद इति विसर्जयेत्–

ओ३म् देवा गातुविदो गातुंव् वित्त्वा गातुमित। मनसस्पतऽ इमन् देव यज्ञꣳ स्वाहा वाते धाः॥ इति। इति तर्पणम्)

---

२९. *अनि "ओ३म् सव्ंवर्चसा" इत्यादि मन्त्र पडेर जलयुक्त हातले मुखविमार्जन (पाँनिले मुख पुछ्ने काम) गरोस्।*

३०. *अनि साइँलिउम्लाले र बुडिउम्लाले जल छोएर तिनै उम्लाले "ओ३म् तच् चक्षुर्" इत्यादि मन्त्रले आँखा छोओस्।*

३१. *अनि "ओ३म् देवा गातुविदः" इत्यादि मन्त्र पडेर विसर्जन गरोस्। याँहाँ तर्पणको पद्धति सक्कियो।*

(ब्राह्मणनिमन्त्रणादिकम्)

[३२]ततो लौकिकनिमन्त्रणेन ब्राह्मणेषु श्राद्धगृहाङ्गने उपस्थितेषु श्राद्धकर्ता शुद्धे आसने उदङ्मुख उपविश्याऽऽचम्य (गोमयोपलिप्ते प्राङ्गणे दीपं प्रज्वलय्य) उपवीत्येव पातितदक्षिणजानुः प्रक्षालितचरणस्य प्राङ्मुखस्य वैश्वदेविकब्राह्मणस्य (कुश-वटोर् वा) दक्षिणजानु दक्षिणहस्तेन स्पृष्ट्वा उत्सृज्य वैश्वदेविकब्राह्मणनिमन्त्रणं कुर्यात्। तद् यथा–

"ओ३म् तत् सत् स्वस्ति। एतस्मिन् ब्रह्माण्डे भूर्लोके भूमण्डले जम्बूद्वीपे

---

३२. अनि लौकिक निमन्त्रणले ब्राह्मण श्राद्धघरका आँगनमा आएपछि श्राद्ध गर्नेले आचमन गरेर *(गोबरले पोतेका आँगनमा दियो बालेर)* उत्तरतिर फर्केर उपवीति (सव्य) नै रएर गोडाधोएका पूर्वफर्केका ब्राह्मणको (अथवा कुशवटुको) दाइने घुँडो छोएर छोडि "ओ३म्। तत् सत्। स्वस्ति" इत्यादि देश-काल-स्मरणयुक्त पूर्ण रूपको श्राद्धसङ्कल्पको उच्चारण गरेर, तेस श्राद्धमा मबाट याँहाँ वैश्वदेविकब्राह्मणका रूपमा आमन्त्रित हुनुहुन्छ भन्ने अर्थ भएको वाक्यले ब्राह्मणलाइ निमन्त्रणा देओस्।

भारतवर्षे कर्मभूमौ कुमारिकाखण्डे आर्यावर्तान्तर्गते हिमालयदक्षिणपार्श्वस्थे विष्णु-प्रजापतिक्षेत्रान्तर्गते पाशुपतक्षेत्रे काष्ठमण्डपनगरे [ग्रामे] राजमातृपत्तनटोल्लके इक्षुमती-समीपे इह पुण्यदेशे वर्तमानस्य ब्रह्मणो द्वितीये परार्धे प्रथमे वर्षे प्रथमे मासे प्रथमे पक्षे प्रथमे दिवसे तदनुसारिणि श्वेतवाराहकल्पे सप्तमे वैवस्वतमन्वन्तरे अष्टा-विंशतितम्यां चतुर्युग्यां कलौ युगे तस्य प्रथमे चरणे पञ्चसु सहस्रेषु एकसप्ततौ च वर्षेषु व्यतीतेषु तदुत्तरे वर्षे प्रवृत्ते चान्द्राणां प्रभवादीनां वैष्णवादिषु द्वादशसु युगेषु सप्तमे पित्र्ये युगे विलम्बापरनामके परिवत्सराख्ये द्वितीये वर्षे दक्षिणायने वर्षासु ऋतौ नभस्ये मासे कृष्णे पक्षे षष्ठ्यां तिथौ अद्य ....शर्मा ....गोत्रः ....प्रवरो माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाध्यायी कात्यायनश्रौतसूत्र-पारस्कर-गृह्यसूत्र-कात्यायनत्रिकण्डिकस्नानसूत्र-कात्यायनश्राद्धकल्पसूत्रानुसारी विश्वेषां

देवानां तृप्तिं कामयमानोऽहम् अस्मत्पितृपितामहप्रपितामहानां ....शर्म-..............शर्म-..........शर्मणां ....गोत्राणां वसुस्वरूप-रुद्रस्वरूपा-ऽऽदित्य-स्वरूपाणां तथा अस्मन्मातामह-प्रमातामह-वृद्धप्रमातामहानाम् ....शर्म-..........शर्म-..........शर्मणां ....गोत्राणां वसुस्वरूप-रुद्रस्वरूपा-ऽऽदित्य-स्वरूपाणां चाऽद्य कर्तव्याभ्यां पार्वणश्राद्धाभ्यां सम्बद्धानां विश्वेषां देवानाम् मासिकापरपक्षश्राद्धानुकल्परूपं नभस्यापरपक्षरूपमहालयप्रयुक्तं श्राद्धं करिष्ये, तत्र मया वैश्वदेविक-ब्राह्मणत्वे भवन्त आमन्त्रिताः" इति वैश्वदेविकब्राह्मण-मामन्त्रयेत।

[३३]वैश्वदेविकब्राह्मणश् च "ओ३म् आमन्त्रिताः स्मः" इति ब्रूयात्।

---

३३. अनि वैश्वदेविकब्राह्मणले "ओ३म् आमन्त्रिताः स्मः" भनेर निमन्त्रणा स्वीकारुन्।

[३४]ततः श्राद्धकर्ता प्राचीनावीती दक्षिणाभिमुखः पातितवामजानुः उदङ्मुखस्य पितृब्राह्मणस्य दक्षिणजानु स्वदक्षिणहस्तेन स्पृष्ट्वा उत्सृज्य "ओ३म्। तत् सत् स्वस्ति। एतस्मिन् ब्रह्माण्डे भूर्लोके भूमण्डले जम्बूद्वीपे भारतवर्षे कर्मभूमौ कुमारिकाखण्डे आर्यावर्तान्तर्गते हिमालयदक्षिणपार्श्वस्थे विष्णुप्रजापतिक्षेत्रान्तर्गते पाशुपतक्षेत्रे काष्ठमण्डपनगरे [ग्रामे] राजमातृपत्तनटोल्लके इक्षुमतीसमीपे इह पुण्यदेशे वर्तमानस्य ब्रह्मणो द्वितीये परार्धे प्रथमे वर्षे प्रथमे मासे प्रथमे पक्षे प्रथमे दिवसे तदनुसारिणि श्वेतवाराहकल्पे सप्तमे वैवस्वतमन्वन्तरे अष्टाविंशतितम्यान् चतुर्युग्यां कलौ युगे तस्य प्रथमे चरणे पञ्चसु सहस्रेषु एकसप्ततौ च वर्षेषु व्यतीतेषु तदुत्तरे वर्षे प्रवृत्ते चान्द्राणां प्रभवादीनां वैष्णवादिषु द्वादशसु युगेषु सप्तमे पित्र्ये युगे विलम्बापरनामके

---

३४. अनि श्राद्ध गर्नेले प्राचीनावीति (अपसव्य) भएर दक्षिणतिर फर्केर देउरे घुँडो भूमिसंलग्न गराएर उत्तरफर्केका पितृब्राह्मणको दाइने घुँडो आँफ्ना दाइने हातले छोएर छोडेर "ओ३म्। तत् सत्" इत्यादि वाक्य भनेर पितृब्राह्मणलाइ निम्तागरोस्।

परिवत्सराख्ये द्वितीये **वर्षे दक्षिणायने** वर्षासु **ऋतौ** नभस्ये **मासे** कृष्णे **पक्षे** षष्ठ्यां **तिथौ** अद्य ....शर्मा ....गोत्रः ....प्रवरो माध्यन्दिनीय-वाजसनेयि-शुक्ल-यजुर्वेदशाखाध्यायी कात्यायनश्रौतसूत्र-पारस्करगृह्यसूत्र-कात्यायनत्रिकण्डिकस्नान-सूत्र-कात्यायनश्राद्धकल्पसूत्रानुसारी पितॄणां तृप्तिं कामयमानोऽहम् अस्मत्पितृ-पितामहप्रपितामहानां ....शर्म-..........शर्म-..........शर्मणां ....गोत्राणां वसुस्वरूप-रुद्रस्वरूपा-ऽऽदित्यस्वरूपाणाम् अद्य कर्तव्यं मासिकापरपक्षश्राद्धा-नुकल्परूपं नभस्यापरपक्षरूपमहालयप्रयुक्तं श्राद्धं करिष्ये, तत्र मया पितृब्राह्मणत्वे भवन्त आमन्त्रिताः" इति पितृब्राह्मणमामन्त्रयेत।

[३५]"पितृब्राह्मणश् च "ओ३म् आमन्त्रिताः स्मः" इति ब्रूयात्।

---

३५. पितृब्राह्मणले पनि "ओ३म् आमन्त्रिताः स्मः" भनुन्।

[३६]ततस् तथैव उदङ्मुखस्य मातामहब्राह्मणस्य दक्षिणजानु स्पृष्ट्वा उत्सृज्य "ओ३म्। तत् सत् स्वस्ति। एतस्मिन् ब्रह्माण्डे भूर्लोके भूमण्डले जम्बूद्वीपे भारतवर्षे कर्मभूमौ कुमारिकाखण्डे आर्यावर्तान्तर्गते हिमालयदक्षिणपार्श्वस्थे विष्णुप्रजापति-क्षेत्रान्तर्गते पाशुपतक्षेत्रे काष्ठमण्डपनगरे [ग्रामे] राजमातृपत्तनटोल्लके इक्षुमतीसमीपे इह पुण्यदेशे वर्तमानस्य ब्रह्मणो द्वितीये परार्धे प्रथमे वर्षे प्रथमे मासे प्रथमे पक्षे प्रथमे दिवसे तदनुसारिणि श्वेतवाराहकल्पे सप्तमे वैवस्वतमन्वन्तरे अष्टाविंशतितम्यां चतुर्युग्यां कलौ युगे तस्य प्रथमे चरणे पञ्चसु सहस्रेषु एकसप्ततौ च वर्षेषु व्यतीतेषु तदुत्तरे वर्षे प्रवृत्ते चान्द्राणां प्रभवादीनां वैष्णवादिषु द्वादशसु युगेषु सप्तमे पित्र्ये युगे विलम्बापरनामके परिवत्सराख्ये द्वितीये वर्षे दक्षिणायने वर्षासु ऋतौ नभस्ये मासे कृष्णे

---

३६. अनि तेसै गरेर मातामहब्राह्मणलाइ निम्तागरोस्।

पक्षे षष्ठ्यां तिथौ अद्य ....शर्मा ....गोत्रः ....प्रवरो माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाध्यायी कात्यायनश्रौतसूत्र-पारस्करगृह्यसूत्र-कात्यायनत्रिकण्डिकस्नानसूत्र-कात्यायनश्राद्धकल्पसूत्रानुसारी मातामहानां तृप्तिं कामयमानोऽहम् अस्मन्मातामह-प्रमातामह-वृद्धप्रमातामहानाम् ....शर्म-..........शर्म-..............शर्मणां ....गोत्राणां वसुस्वरूप-रुद्रस्वरूपा-ऽऽदित्यस्वरूपाणाम् अद्य कर्तव्यं मासिकापरपक्षश्राद्धानुकल्परूपं नभस्यापरपक्षरूपमहालयप्रयुक्तं श्राद्धं करिष्ये, तत्र मया मातामह-ब्राह्मणत्वे भवन्त आमन्त्रिताः" इति मातामह-ब्राह्मणमामन्त्रयेत।

[३७]मातामह-ब्राह्मणश् च "ओ३म् आमन्त्रिताः स्मः" इति ब्रूयात्।

---

३७. मातामहब्राह्मणले पनि "ओ३म् आमन्त्रिताः स्मः" भनुन्।

(नियमश्रावणम्)

[३८](तत आमन्त्रयिता नियमान् श्रावयेत्– "ओ३म् अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः। भवितव्यं भवद्भिश् च मया च श्राद्धकारिणा। सर्वाऽऽयासविनिर्मुक्तैः कामक्रोधविवर्जितैः। भवितव्यं भवद्भिर् वै प्रकृते श्राद्धकर्मणि" इति। ब्राह्मणाश् च– "ओम्, भवितव्यम्" इति प्रतिब्रूयुः।

(ब्राह्मणपादप्रक्षालनं पादार्घदानं च)

[३९]ततः श्राद्धकर्ता **उपवीती** भूत्वा पादार्घपात्रं भूमौ निधाय तत्र कुशजलयवपुष्पाण्यादध्यात्। ततो जलपात्रेण वैश्वदेविकब्राह्मणचरणौ प्रक्षालयेदनेन मन्त्रेण– "ओ३म् नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्र-पादाक्षिशिरोरुबाहवे। सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः" इति। ततो विप्रपाद-

---

३८. *अनि निमन्त्रणा गर्नेले "ओ३म्। अक्रोधनैः" इत्यादि वचनहरुले नियमहरु सुनाओस्। ब्राह्मणहरुले पनि "ओ३म् भवितव्यम्" भनेर नियम स्वीकारुन्।*

३९. *अनि श्राद्ध गर्नेले उपवीति (सव्य) भएर दुनामा कुश-जल-जौ-फुलहरु हालेर पादार्घ बनाओस् अनि जलपात्रले "ओ३म् नमोऽस्त्व-नन्ताय" इत्यादि मन्त्रले ब्राह्मणको पाउ धोओस् र "यत् फलम्" इत्यादि ब्राह्मणको पाउ धुने कामको माहात्म्य पडोस्। अनि देउरे हातमा पादार्घपात्र राखेर "शन् नो देवीः" इत्यादि मन्त्र पडेर कुशतिलजल र पादार्घपात्र दाइने हातले लिएर "ओ३म् अस्मत्पितृ" इत्यादि वाक्य पडि वैश्वदेविक ब्राह्मणका पाउमा पादार्घ देओस्।*

प्रक्षालनमाहात्म्यं पठेत्— "यत् फलं कपिलादाने कार्तिक्यां ज्येष्ठपुष्करे। तत् फलं पाण्डवश्रेष्ठ विप्राणां पादशौचने" इति।

ततः पादार्घपात्रं वामहस्ते कृत्वा "शन् नो देवीरभिष्टयऽ आपो भवन्तु पीतये। शंय् योरभिस्रवन्तु नः" इति मन्त्रं पठित्वा कुशादिकमादाय पादार्घपात्रं दक्षिणहस्ते कृत्वा "ओ३म् अस्मत्पितृ-पितामह-प्रपितामहानाम् ……शर्म-……शर्म-……शर्मणां ……गोत्राणाम् वसु-रुद्रा-ऽऽदित्यस्वरूपाणां तथाऽस्मन्माता-मह-प्रमातामह-वृद्धप्रमातामहानाम् ……शर्म-……शर्म-……शर्मणां ……गोत्राणाम् वसु-रुद्रा-ऽऽदित्यस्वरूपाणां चाऽद्यकर्तव्यभाद्रपदाऽपरपक्षरूपमहालयान्तर्गतपार्वणश्राद्धयोस् तच्छ्राद्धसम्बन्धिनो विश्वे देवाः पुरूरवोमाद्रवोनामानः एष पादार्घो वः स्वाहा" इति पादार्घं वैश्वदेविकब्राह्मणपादयोर् दद्यात्।

[40]ततो**ऽपसव्येन** द्वे अर्घपात्रे भूमौ निधाय तत्र कुशजलतिलपुष्पाण्यादध्यात्। ततो जलपात्रेण पितृ-ब्राह्मणस्य चरणौ प्रक्षालयेत् "ओ३म् नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे। सहस्रनाम्ने

---

४०. *अनि प्राचीनावीति (अपसव्य) भएर २ दुनाहरुमा कुश-जल-तिल-फुलहरु हालेर पादार्घहरु बनाओस्। अनि जलपात्रले "ओ३म् नमोऽस्त्वनन्ताय" इत्यादि मन्त्रले पितृब्राह्मणका पाउ धोओस् र "यत् फलम्" इत्यादि ब्राह्मणको पाउ धुने कामको माहात्म्य पडोस्। अनि देउरे हातमा पैलो पादार्घपात्र राखेर "शन् नो देवीः" इत्यादि मन्त्र पडेर मोटकतिलजल र पैलो पादार्घपात्र दाइने हातले लिएर "ओ३म् अस्मत्पितृ" इत्यादि वाक्य भनेर पितृब्राह्मणका पाउमा पादार्घ देओस्।*

पुरुषाय शाश्वते सहस्रकोटी युगधारिणे नमः" इति। "यत्फलं कपिलादाने कार्तिक्यां ज्येष्ठपुष्करे। तत्फलं पाण्डवश्रेष्ठ विप्राणां पादशौचने" इति ब्राह्मणपादधावनमाहात्म्यं च पठेत्। प्रथमं पादार्घपात्रं वामहस्ते कृत्वा "शन् नो देवीरभिष्टयऽ आपो भवन्तु पीतये। शंय् योरभिस्रवन्तु नः" इति मन्त्रं पठित्वा मोटकजलमादाय प्रथमं पादार्घपात्रं दक्षिणहस्ते कृत्वा "ओ३म् अस्मत्पितृ-पितामह-प्रपितामहाः …………शर्म-…………शर्म-…………शर्माणः …………गोत्रा वसु-रुद्रा-ऽऽदित्यस्वरूपाः अद्यकर्तव्यभाद्रपदाऽपरपक्षरूपमहालयान्तर्गतपार्वणश्राद्धे एष पादार्घस् त्रेधा विभज्य युष्मभ्यं स्वधा" इति पादार्घं पितृब्राह्मणपादयोर् दद्यात्।

[४१]पुनः पूर्ववत् कृत्वा मातामहब्राह्मणपादप्रक्षालनादिकं कृत्वा मोटकतिलजलमादाय द्वितीयं पादार्घपात्रं दक्षिणहस्ते कृत्वा "ओ३म् अस्मन्मातामह-प्रमातामह-वृद्धप्रमातामहाः …………शर्म-…………शर्म-…………शर्माणः …………गोत्रा वसु-रुद्रा-ऽऽदित्यस्वरूपाः अद्यकर्तव्यभाद्रपदाऽपरपक्षरूपमहालयान्तर्गतपार्वणश्राद्धे एष पादार्घस् त्रेधा विभज्य युष्मभ्यं स्वधा" इति पादार्घं मातामहब्राह्मणपादयोर् दद्यात्।

[४२]**ततः श्राद्धकर्ता** उपवीती **भूत्वाऽऽचम्य ब्राह्मणान् गृहं प्रवेशयेत्।**

---

४१. *फेरि अगिजस्तै गरेर मातामहब्राह्मणका पाउ धुने इत्यादि काम गरेर मोटक-तिल-जल र दोस्रो पादार्घपात्र दाइने हातले लिएर "ओ३म् अस्मन्मातामह" इत्यादि वाक्य भनेर मातामहब्राह्मणलाई पाउमा पादार्घ देओस्।*

४२. अनि श्राद्ध गर्नेले उपवीति (सव्य भएर) आचमन गरि ब्राह्मणहरुलाइ श्राद्धघरमा प्रवेश गराओस्।

[४३]श्राद्धकर्ता तदहः शुचिरक्रोधनोऽत्वरितोऽप्रमत्तः सत्यवादी स्यात्, अध्व-मैथुन-श्रम-स्वाध्यायान् वर्जयेत्, आवाहनादि वाग्यत ओपस्पर्शनात्, आमन्त्रिताश् चैवम्।

(स्वागतप्रश्नादिकम्)

[४४]आमन्त्रितेषु ब्राह्मणेषु श्राद्धदेशं प्राप्तेषु श्राद्धकर्ता उपवीत्येव "ओ३म् स्वागता यूयम्" इति ब्राह्मणान् पृच्छेत्।

[४५]ब्राह्मणाश् च "ओ३म् सुस्वागता वयम्" इति ब्रूयुः।

---

४३. श्राद्ध गर्ने पुरुष तेस दिन शुद्ध, नरिसाउने, हतपत नगर्ने, भुल नगर्ने, साँचो बोल्ने होओस्। धेरै बाटो हिँण्ने, स्त्रीभोग गर्ने, बर्ता परिश्रम गर्ने र वेदको अध्ययन गर्ने पनि नहोओस्। आवाहनदेखि ब्राह्मणभोजनान्त आचमन नभएसम्म शास्त्रविहित वणीदेखि अरु वाणी नबोल्ने होओस्। निम्तिएका ब्राह्मण पनि तेस्तै होउन्।

४४. आमन्त्रित ब्राह्मण श्राद्ध गर्ने ठाममा आइपुगेपछि श्राद्ध गर्नेले जनै र उपर्ना देउरे काँदमा पारेर (सव्य भएर) नै "सुखसित आउनुभयो ?" भन्ने अर्थ भएका वाक्यले सोदोस्।

४५. ब्राह्मणले "अत्यन्त-सुखसित आएम्" भन्ने अर्थ भएको वाक्य बोलुन्।

(ब्राह्मणोपवेशनम्)

४६ **ततः श्राद्धकर्ता "ओ३म् एतानि आसनानि, उपविशन्तु भवन्तः" इति ब्रूयात्।**

४७ **ब्राह्मणाश् च "ओ३म् उपविशामः" इति ब्रूयुः।**

४८ **ततः श्राद्धकर्ता वैश्वदेविकब्राह्मणं श्राद्धदेशपश्चिमोत्तरभागे** ("ओ३म् भूर् भुवः स्वः" इत मन्त्रेण) **प्राङ्मुखमुपवेशयेत्, पितृब्राह्मणम्, मातामहब्राह्मणं च श्राद्धदेशदक्षिणभागे** ("ओ३म् भूर्भुवः स्वः" इति मन्त्रेण मन्त्रावृत्या) **उदङ्मुखतया प्राक्संस्थतया च क्रमेणोपवेशयेत्।**

---

४६. अनि श्राद्ध गर्नेले "इ आसन हुन्, याँहाँहरु बस्नुहोस्" भन्ने अर्थ भएको वाक्य भनोस्।

४७. ब्राह्मणले "हुन्च बश्चम्" भन्ने अर्थ भएको वाक्य बोलुन्।

४८. अनि श्राद्ध गर्नेले वैश्वदेवब्राह्मणलाइ श्राद्धदेशका पश्चिमोत्तर भागमा पूर्वफर्काएर *("ओ३म् भूर् भुवः स्वः" एस मन्त्रले)* आसनमा बसाओस्, अनि पितृब्राह्मणलाइ श्राद्धदेशका दक्षिणभागमा पश्चिपट्टि *("ओ३म् भूर् भुवः स्वः" एस मन्त्रले)* उत्तरतिर फर्काएर बसओस्, अनि मातामहब्राह्मणलाइ पनि श्राद्धदेशका दक्षिणभागमा नै पितृब्राह्मणका पूर्वपट्टि *("ओ३म् भूर् भुवः स्वः" एस मन्त्रले)* उत्तरतिर फर्काएर बसाओस्।

(कर्मपात्रकरणादिकम्)

[४९](ततः श्राद्धकर्ता **उपवीती** प्राङ्मुखो वैश्वदेवादिकर्मार्थं कर्मपात्रे तोयाभिमन्त्रणं कर्तुम् "ओ३म् वैश्वदेवादिकर्मार्थं तोयाभिमन्त्रणमहं करिष्ये" इति वैश्वदेवब्राह्मणानुज्ञां प्रार्थयेत। वैश्वदेवब्राह्मणश् च "ओ३म् कुरुष्व" इत्यनुज्ञां दद्यात्। ततश् च श्राद्धकर्ता अक्षतपुञ्जोपरि ताम्रपात्रं निधाय तत्र पवित्रे कुशाँश् च क्षिप्त्वा "ओ३म् शन् नो देवीरभिष्टयऽ आपो भवन्तु पीतये। शंय् योरभिस्रवन्तु नः" इति मन्त्रेण जलं क्षिपेत्। ततस् तत्र "ओ३म् यवोऽसि यवयाऽस्मद् द्वेषो यवयाऽरातीः" इति मन्त्रेण यवान्, "ओ३म् अक्षन्नमीमदन्त ह्यव प्रियाऽ अधूषत। अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी" इति मन्त्रेणाऽक्षतान्, "ओ३म् श्रीश् च ते लक्ष्मीश् च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणाऽमुम् मऽ इषाण सर्वलोकम् मऽ इषाण" इति मन्त्रेण पुष्पाणि, "ओ३म् गन्धद्वारान् दुराधर्षान्

---

४९. अनि श्राद्ध गर्नेले जनै र उपर्ना देउरे काँदमा पारेर (सव्य भएर) देवकर्मपात्र बनाउन वैश्वदेविकब्राह्मणको अनुमति मागोस्। वैश्वदेविकब्राह्मणले अनुमति दिउन्। अनि श्राद्ध गर्नेले अक्षताका थुप्रामाथि तामाको पात्र राखेर त्याँहाँ पवित्र र मोटककुशहरु हालि "ओ३म् शन् नो देवी" इत्यादि मन्त्रले जल हालोस्। "ओ३म् यवोऽसि" इत्यादि मन्त्रले जौ हालोस्। "ओ३म् अक्षन्" इत्यादि मन्त्रले सेता अछेता हालोस्। "ओ३म् श्रीश् च" इत्यादि मन्त्रले फुल हालोस्। अनि "ओ३म् गन्धद्वाराम्" इत्यादि मन्त्रले श्रीखण्डचन्दन हालोस्। अनि "ओ३म् पवित्रे स्थः" इत्यादि मन्त्रले कर्मपात्रबाट पवित्र झिकेर "ओ३म् यद् देवाः" इत्यादि मन्त्रले कर्मपात्रको जल पवित्रले आलोडित गरोस् (चलाओस्)।

नित्यपुष्टाङ् करीषिणीम्। ईश्वरीं सर्वभूतानान् तामिहोपह्वये श्रियम्" इति मन्त्रेण श्रीखण्डचन्दनं क्षिपेत्। ततः "ओ३म् पवित्रे स्थो वैष्णव्यौ" इति मन्त्रेण कुशपवित्रे ताम्रपात्राद् आदाय ताभ्यां पवित्राभ्यां "ओ३म् यद् देवा" इत्यादिभिर् मन्त्रैः ताम्रपात्रस्थं जलमालोडयेत्– "ओ३म् यद् देवा देवहेडनन् देवासश् चकृमा वयम्। अग्निर् मा तस्मादेनसो विश्वान् मुञ्चत्वꣳहसः॥ यदि दिवा यदि नक्तमेनाꣳसि चकृमा वयम्। वायुर् मा तस्मादेनसो विश्वान् मुञ्चत्वꣳहसः॥ यदि जाग्रद् यदि स्वप्नऽ एनाꣳसि चकृमा वयम्। सूर्यो मा तस्मादेनसो विश्वान् मुञ्चत्वꣳहसः" इति।

[५०]ततः श्राद्धकर्ता **प्राचीनावीती** दक्षिणाभिमुखः पित्र्यकर्मार्थं कर्मपात्रे तोयाभिमन्त्रणं कर्तुम् "ओ३म् तोयाभिमन्त्रणमहं करिष्ये" इति पितृब्राह्मण-मातामहब्राह्मणानुज्ञां प्रार्थयेत। तौ च "ओ३म् कुरुष्व" इत्यनुज्ञां दद्याताम्। ततश् च श्राद्धकर्ता अक्षतपुञ्जोपरि ताम्रपात्रं निधाय तत्र पवित्रे कुशाँश् च क्षिप्त्वा "ओ३म्

---

५०. *अनि श्राद्ध गर्नेले जनै र उपर्ना दाइने काँदमा पारेर (अपसव्य भएर) दक्षिणतिर फर्केर पितृकर्मपात्र बनाउन पितृब्राह्मण-मातामह-ब्राह्मणहरुको अनुमति मागोस्। तिनले अनुमति दिउन्। अनि श्राद्ध गर्नेले अक्षताका थुप्रामाथि तामाको आर्को पात्र राखेर त्याँहाँ पवित्र र मोटककुशहरु हालि "ओ३म् शन् नो देवी" इत्यादि मन्त्रले जल हालोस्। "ओ३म् तिलोऽसि" इत्यादि मन्त्रले तिल हालोस्। "ओ३म् अक्षन्" इत्यादि मन्त्रले सेता अछेता हालोस्। "ओ३म् श्रीश् च" इत्यादि मन्त्रले फुल हालोस्। अनि "ओ३म् गन्धद्वाराम्" इत्यादि मन्त्रले श्रीखण्डचन्दन हालोस्। अनि "ओ३म् पवित्रे स्थः" इत्यादि मन्त्रले कर्मपात्रबाट पवित्र झिकेर "ओ३म् यद् देवाः" इत्यादि मन्त्रले कर्मपात्रको जल पवित्रले आलोडित गरोस् (चलाओस्)।*

शन् नो देवीरभिष्टयऽ आपो भवन्तु पीतये। शंय् योरभिस्रवन्तु नः" इति मन्त्रेण जलं क्षिपेत्। ततस् तत्र "ओ३म् तिलोऽसि सोमदैवत्यो गोसवो देवनिर्मितः। प्रत्नमद्भिः पृक्तः स्वधया पितॄल्ँ लोकान् प्रीणाहि नः स्वाहा" इति मन्त्रेण तिलान्, "ओ३म् अक्षन्नमीमदन्त ह्यव प्रियाऽ अधूषत। अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी" इति मन्त्रेणाऽक्षतान्, "ओ३म् श्रीश् च ते लक्ष्मीश् च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणाऽमुम् मऽ इषाण सर्वलोकम् मऽ इषाण" इति मन्त्रेण पुष्पाणि, "ओ३म् गन्धद्वारान् दुराधर्षान् नित्यपुष्टाङ् करीषिणीम्। ईश्वरीं सर्वभूतानान् तामिहोपह्वये श्रियम्" इति मन्त्रेण श्रीखण्डचन्दनं क्षिपेत्। ततः "ओ३म् पवित्रे स्थो वैष्णव्यौ" इति मन्त्रेण कुशपवित्रे ताम्रपात्राद् आदाय ताभ्यां पवित्राभ्यां "ओ३म् यद् देवा" इत्यादिभिर् मन्त्रैः ताम्रपात्रस्थं जलमालोडयेत्– "ओ३म् यद् देवा देवहेडनन् देवासश् चकृमा वयम्। अग्निर् मा तस्मादेनसो विश्वान् मुञ्चत्वꣳहसः॥ यदि दिवा यदि नक्तमेनाꣳसि चकृमा वयम्। वायुर् मा तस्मादेनसो विश्वान् मुञ्चत्वꣳहसः॥ यदि जाग्रद् यदि स्वप्नऽ एनाꣳसि चकृमा वयम्। सूर्यो मा तस्मादेनसो विश्वान् मुञ्चत्वꣳहसः" इति।

[५१]तत **उपवीती** भूत्वा कुशैर् देवकर्मपात्ररूपताम्रपात्रस्थं जलमुद्धृत्योद्धृत्य आत्मानम्, श्राद्धभूमिं

---

५१. *अनि उपवीति (सव्य) भएर कुशले देवकर्मपात्रको जल झिकेर आफ्नो, श्राद्धभूमिको र श्राद्धका सामग्रीको पनि प्रोक्षण (सेचन) गरोस् र परमात्माको स्मरण गरोस् र परमात्माको स्मरणको "अपवित्रः पवित्रो वा" इत्यादि माहात्म्य पढोस्।*

सर्वं श्राद्धोपकरणं च प्रोक्षेत्। ततः– "ओ३म् परमात्मने नमः (ओ३म् पुण्डरीकाक्षाय नमः)" इति परमात्मस्मरणं (पुण्डरीकाक्षस्मरणं) कुर्यात्। ततः "अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा। यः स्मरेत् परमात्मानं (पुण्डरीकाक्षं) स बाह्याऽभ्यन्तरः शुचिः" इति परमात्मस्मरणमाहात्म्यं (पुण्डरीकाक्षस्मरणमाहात्म्यं) पठेत्।

(प्रतिज्ञासङ्कल्पः)

[५२]ततो देवकर्मपात्ररूपताम्रपात्रस्थकुशादिकमादाय प्रतिज्ञासङ्कल्पं कुर्वीत– "ओ३म्। तत् सत्। स्वस्ति। श्रीमद्‌भगवतो महापुरुषस्य अचिन्त्यापरिमितमायाशक्तिकस्य लीलामयेच्छया सृष्टानां शतकोटियोजनविस्तारकाणाम् पृथिव्यप्तेजोवाय्वाकाशाऽहङ्कारमहदव्यक्तरूपावरणाऽऽवृतचतुर्दशभुवनात्मकानामनन्तकोटिसङ्ख्याकानां ब्रह्माण्डानामेकतमस्मिन्नेतस्मिन् ब्रह्माण्डे भूर्लोके भूमण्डले जम्बूद्वीपे भारतवर्षे कर्मभूमौ कुमारिकाखण्डे आर्यावर्तान्तर्गते हिमालयदक्षिणपार्श्वस्थे विष्णुप्रजापतिक्षेत्रान्तर्गते गण्डकीप्रदेशे ....ग्रामे [नगरे] इह पुण्यदेशे वेदोक्तजगत्सृष्टिकारिणो नारायणनाभिकमलोद्‌भवस्यैतस्य वर्तमानस्य ब्रह्मणो द्वितीये परार्धे प्रथमे वर्षे प्रथमे मासे प्रथमे पक्षे प्रथमे दिवसे तदनुसारिणि च ब्रह्मतिथ्यात्मकेषु मत्स्यपुराणाद्युक्तेषु श्वेतवाराहादिषु त्रिंशति कल्पेषु प्रथमे श्वेतवाराहकल्पे स्वायम्भुवादिषु चतुर्दशसु

---

५२. *अनि देवकर्मपात्रका कुशजल लिएर "ओ३म्। तत्। सत्। स्वस्ति" इत्यादि प्रतिज्ञासङ्कल्प गरोस्।*

मन्वन्तरेषु सप्तमे वैवस्वतमन्वन्तरे एकसप्ततौ ससन्ध्या-सन्ध्यांशासु चतुर्युगीषु अष्टाविंशतितम्यां चतुर्-युग्याम्, तत्र च सत्यत्रेताद्वापरेषु व्यतीतेषु कलौ युगे प्रवृत्ते तस्य च प्रथमे चरणे पञ्चसु सहस्रेषु एकसप्तत्तौ च वर्षेषु व्यतीतेषु तदुत्तरे वर्षे प्रवृत्ते वेदोक्तपञ्चवर्षात्मकयुगानुसारिणां चान्द्राणां प्रभवादीनां षष्टेः संवत्स-राणां पञ्चवर्षात्मकेषु वैष्णवादिषु द्वादशसु युगेषु सप्तमे पित्र्ये युगे तस्य च वेदोक्तेषु संवत्सरपरिवत्सरेदा-वत्सरेद्वत्सरवत्सराख्येषु पञ्चसु वर्षेषु चान्द्रे विलम्बापरनामके परिवत्सराख्ये द्वितीये वर्षे प्रवृत्ते दक्षिणायने वर्षासु ऋतौ नभस्ये मासे कृष्णे पक्षे षष्ठ्यां तिथौ (गरे करणे)* रेवत्यां नक्षत्रे (विष्कम्भादिषु सप्तविंशतौ योगेषु अष्टमे धृतौ योगे शनैश्चरवासरे श्रीसूर्ये कर्कटराशौ स्थिते चन्द्रमसि मीनराशौ स्थिते देवगुरौ च वृश्चिकराशौ स्थिते शेषेषु ग्रहेषु यथायथं राशिषु स्थितेषु सत्सु एवं ग्रहगणविशेषेण विशिष्टे) शुभे पुण्ये काले अद्य ....शर्मा ....गोत्रः ....प्रवरो माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशाखा-ध्यायी कात्यायनश्रौतसूत्र-पारस्करगृह्यसूत्र-कात्यायनत्रिकण्डिकस्नानसूत्र-कात्यायनश्राद्धकल्पसूत्राऽनु-सारी पित्रादितृप्तिकामः अहम् अस्मत्पितृ-पितामह-प्रपितामहानाम् ....शर्म-..........शर्म-.......... शर्मणाम् ....गोत्राणां वसु-रुद्रा-ऽऽदित्यस्वरूपाणाम् तथा अस्मन्मातामह-प्रमातामह-वृद्धप्रमाता-महानाम् ....शर्म-..........शर्म-..........शर्मणाम् ....गोत्राणां वसु-रुद्रा-ऽऽदित्यस्वरूपाणां

---

* *कोष्ठभित्रका करण, योग, वार, सूर्यादि रएको राशि इत्यादिको उच्चारण इच्छा नलागे नगरे पनि हुञ्छ।*

पुरूरवोमाद्रवोनामकैर् विश्वेभिर् देवैः पुरस्सरैर् युक्तानाम् अद्य कर्तव्यं भाद्रपदापरपक्षरूपमहालयान्तर्गतपार्वणश्राद्धमेभिर् द्रव्यैः करिष्ये।" इति प्रतिज्ञां कृत्वा कुशादिकमुत्सृजेत्।

(पौराणमन्त्रादिपाठः)

[५३]ततः श्राद्धसम्पत्त्यै पौराणमन्त्रान् पठेत्— "ओ३म् देवताभ्यः पितृभ्यश् च महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमोनमः" इति त्रिः पठेत्। "सप्त व्याधा दशार्णेषु मृगाः कालञ्जरे गिरौ। चक्रवाकाः शरद्वीपे हंसाः सरसि मानसे॥ तेऽभिजाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः। प्रस्थिता दीर्घमध्वानं यूयं किमवसीदथ॥ ये विप्रमुख्याः कुरुजाङ्गलेषु जातास् तथा दासकुले मृगाश् च। कालञ्जरे सप्त च चक्रवाका ये मानसे ते वयमत्र सिद्धाः॥ पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः। यत्रयत्र स्मरेद् विद्वान् पितृणां दत्तमक्षयम्॥ श्राद्धभूमौ गयां ध्यात्वा तथा देवं गदाधरम्। उभाभ्यां च नमस्कृत्य ततः श्राद्धं समारभेत्॥ गयागजो गयादित्यो गायत्री च गदाधरः। गया गयाशिरश् चैव षड् गया मुक्तिदायिकाः॥ ईशान-विष्णु-कमलासन-कार्त्तिकेय-वह्नित्रया-ऽर्क-रजनीश-गणेश्वराणाम्। क्रौञ्चा-ऽमरेन्द्र-कलशोद्भव-कश्यपानां पादान् नमामि सततं पितृमुक्तिहेतोः॥ ओ३म् गयायै नमः, ओ३म् गदाधराय नमः" इति च पठेत्।

---

५३. *अनि श्राद्ध सुसम्पन्न होस् भनेर श्राद्ध गर्नेले पुराणहरुमा बताएको "ओ३म् देवताभ्यः पितृभ्यश च" इत्यादि मन्त्र तिनपल्ट पढेर "सप्त व्याधा दशार्णेषु" इत्यादि पढोस्।*

(दिक्षु तिलविकरणम् [दिग्बन्धनम्])

[५४]तत आर्द्रमोटकेन तिलान् गृहीत्वागृहीत्वा तान् दिक्षु विकिरेत्– "ओ३म् अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम्" (इति प्राच्याम्)। "तथा बर्हिषदः पान्तु याम्यां ये पितरः स्थिताः" (इति दक्षिणस्याम्)। "प्रतीचीमाज्यपास् तद्वद्" (इति प्रतीच्याम्)। "उदीचीमपि सोमपाः" (इति उदीच्याम्)। "अधोर्ध्वमपि कोणेषु विकोणेषु च सर्वशः॥ रक्षोभूतपिशाचेभ्यस् तथैवाऽसुरदोषतः। सर्वतश् चाऽधिपस् तेषां यमो रक्षां करोतु मे। वायुभूतपितृणाञ् च तृप्तिर् भवतु शाश्वती" (इति अधस्तादूर्ध्वं कोणेषु सर्वतश् च)।

(नीविकरणम्)

[५५]तत आचारात् "ओ३म् निहन्मि सर्वं यदमेध्यवद् भवेद् धताश् च सर्वेऽसुरदानवा मया। रक्षांसि यक्षाः सपिशाचगुह्यका हता मया यातुधानाश् च सर्वे" इति तिलप्रक्षेपणे वेद्युल्लेखने पठने वा कुत्रचित् पुराणे विहितेन मन्त्रेण तिलविकरणे प्रयुक्तं मोटकं पुष्पं च (सतिलकुशत्रयं वा) श्राद्धकाशिकाकारव्याख्यानान् नाभिदक्षिणभागे अपवर्तिकायां धारयेत् (नीविं कुर्यात्)।

---

५४. अनि भिजेको मोटकले तिल लिँदै "ओ३म् अग्निष्वात्ताः" इत्यादि मन्त्रले सबै दिशामा तिल छरेर दिग्बन्धन गरोस्।

५५. अनि आचारप्राप्त हुनाले "ओ३म् निहन्मि सर्वम्" इत्यादि मन्त्रले नीविमा (धोतिको बिट फर्काएको ठाममा दाइनेपट्टि) अगि तिल छरेको मोटक र फुल वा अरु नै तिलकुश घुसारेर नीविकरण गरोस्।

(दैतेयाद्यपसारणम्)

[५६]ततः सतिलकुशत्रयमादाय "ओ३म् प्रयान्तु दूरतः सर्वे दैतेया दानवास् तथा। सर्वविघ्नोपशान्त्यर्थं क्षिपामि च कुशाँस् तिलान्॥ तिला रक्षन्तु असुरान् दर्भा रक्षन्तु राक्षसान्। पङ्क्तिं वै श्रोत्रियो रक्षेदतिथिः सर्वरक्षकः" इति दक्षिणतो द्वारदेशे क्षिपेत्।

(विष्णुस्मरणम्)

[५७]तत **उपवीत्येव** आचम्य विष्णुं स्मरेत्– "ओ३म् नमो नमस्ते गोविन्द पुराणपुरुषोत्तम। इदं श्राद्धं हृषीकेश रक्ष्यतां सर्वतो दिशः" इति)।

(आसने कुशास्तरणम्)

[५८]**ततः श्राद्धकर्ता** उपवीत्येव **पातितदक्षिणजानुः वैश्वदेविकब्राह्मणस्याऽऽसने**

---

५६. *अनि तिलसहित तिन कुश लिएर दैत्य-दानवादि हटाउन दक्षिणतिर ढोकातिर "ओ३म् प्रयान्तु दूरतः सर्वे" इत्यादि मन्त्रले तिल र तिन कुशहरु फालोस्।*

५७. *अनि जनै र उपर्ना देउरे काँदमा पारेर (सव्य भएर) आचमन गरेर "ओ३म् नमो नमस्ते" इत्यादि मन्त्रले विष्णुको स्मरण गरोस्।*

५८. अनि उपवीति नै रहेर दाइने घुँडो भूमिसंलग्न गरेर वैश्वदेविकब्राह्मणका आसनमा आसनका दाइनेतिर सोजा कुशहरु ओच्छ्याओस्।

आसनदक्षिणभागे तूष्णीमेव ऋजुदर्भान् आस्तृणीयात्।

[५९](**उपवीती** श्राद्धकर्ता कुशमादाय "ओ३म् अस्मत्पितृ-पितामह-प्रपितामहानाम् ....शर्म- ....शर्म-..........शर्मणाम् ....गोत्राणां वसु-रुद्रा-ऽऽदित्यस्वरूपाणाम् तथा अस्मन्मातामह-प्रमातामह-वृद्धप्रमातामहानाम् ....शर्म-..........शर्म-..........शर्मणाम् ....गोत्राणां वसु-रुद्रा-ऽऽदित्यस्वरूपाणां श्राद्धाभ्यां सम्बद्धानां पुरूरवोमाद्रवोनाम्नां विश्वेषां देवानामिदं कौशमासनं वः स्वाहा" इति वैश्वदेविकब्राह्मणाय कुशरूपमासनं दद्यात्).

[६०]**ततः श्राद्धकर्ता** प्राचीनावीती **भूत्वा दक्षिणाभिमुखः पातितवामजानुः पितृ-ब्राह्मणाऽऽसने मातामहब्राह्मणाऽऽसने च आसनवामभागे तूष्णीमेव द्विगुणान् दर्भान् क्रमेण आस्तृणीयात्।**

---

५९. *अनि श्राद्ध गर्नेले "ओ३म् अस्मत्पितृ" इत्यादि वाक्यले वैश्वदेविकब्राह्मणलाइ कुशरूप आसन देओस्।*

६०. अनि श्राद्ध गर्नेले जनै र उपर्ना दाइने काँदमा पारेर् (अपसव्य भएर) दक्षिणतिर फर्केर देउरे घुँडो भूमिसंलग्न पारेर द्विगुण-दर्भ (दोब्र्याएको कुश, मोटक) पितृब्राह्मणका र मातामहब्राह्मणका आसनमा वामभागमा (देउरेपट्टि) ओच्छ्याओस्।

[६१](**प्राचीनावीत्येव** मोटकमादाय "ओ३म् अस्मत्पितृ-पितामह-प्रपितामहानाम् ....शर्म-........शर्म-........शर्मणाम् ....गोत्राणां वसु-रुद्राऽऽदित्यस्वरूपाणाम् अद्य कर्तव्ये भाद्रपदाऽपरपक्षरूपमहालयान्तर्गते पार्वणश्राद्धे इदं मोटकरूपमासनं त्रेधा विभज्य युष्मभ्यं स्वधा" इति पितृब्राह्मणाय मोटकरूपमासनं दद्यात्।

[६२]पुनरन्यन् मोटकमादाय "ओ३म् अस्मन्मातामह-प्रमातामह-वृद्धप्रमातामहानाम् ....शर्म-..........शर्म-..........शर्मणाम् ....गोत्राणां वसु-रुद्रा-ऽऽदित्यस्वरूपाणाम् अद्य कर्तव्ये भाद्रपदा-ऽपरपक्षरूपमहालयान्तर्गते पार्वणश्राद्धे इदं मोटकरूपमासनं त्रेधा विभज्य युष्मभ्यं स्वधा" इति मातामह-ब्राह्मणाय मोटकरूपमासनं दद्यात्।)

(विश्वेषां देवानामावाहनम्)

[६३]ततः श्राद्धकर्ता उपवीती **भूत्वाऽप उपस्पृश्य वैश्वदेविक-ब्राह्मणं प्रत्यावृत्य वैश्वदेविकब्राह्मणम् "ओ३म् विश्वान् देवानावाहयिष्ये" इति पृच्छेत्।** ("ओ३म् अस्मत्-

---

६१. *प्राचीनावीति (अपसव्य) नै रहेर मोटक लिएर "ओ३म् अस्मत्पितृ" इत्यादि वाक्यले पितृब्राह्मणलाइ मोटकरूप आसन देओस्।*

६२. *फेरि आर्को मोटक लिएर "ओ३म् अस्मन्मातामह" इत्यादि वाक्यले मातामहब्राह्मणलाइ मोटकरूप आसन देओस्।*

६३. अनि श्राद्ध गर्नेले उपवीति (सव्य) भएर आचमन गरेर वैश्वदेवब्राह्मणतिर फर्केर विश्वेदेवहरुको आवाहन गर्न वैश्वदेव-ब्राह्मणसित अनुमति मागोस्।

पितृ-पितामह-प्रपितामहानाम् ……शर्म-……शर्म-………शर्मणाम् ………गोत्राणां वसु-रुद्रा-ऽऽदित्य-स्वरूपाणाम् तथा अस्मन्मातामह-प्रमातामह-वृद्धप्रमातामहानाम् ………शर्म-………शर्म-………शर्मणाम् ………गोत्राणां वसु-रुद्रा-ऽऽदित्यस्वरूपाणाम् अद्य कर्तव्ये भाद्रपदाऽपरपक्षरूपमहालयान्तर्गते पार्वणश्राद्धे तच्छ्राद्धसम्बद्धान् विश्वान् देवान् पुरूरवोमाद्रवोनाम्नः आवाहयिष्ये" इति पृच्छेत्।)

[६४]वैश्वदेविक-ब्राह्मणश् च "ओ३म् आवाहय" इत्यनुजानीयात्।

[६५]ततः श्राद्धकर्ता उत्थाय "ओ३म् विश्वे देवासऽ आगत शृणुता मऽ इमꣳ हवम्। एदम् बर्हिर् निषीदत" इति विश्वान् देवान् आवाहयेत्।

[६६]ततः श्राद्धकर्ता अनामिकामध्यमाङ्गुष्ठैस् तिलानादाय वैश्वदेवश्राद्धदेशे तूष्णीं तिलान् अवकिरेत्।

---

६४. वैश्वदेविकब्राह्मणले अनुमति दिउन्।

६५. अनि श्राद्ध गर्नेले उठेर "ओ३म् विश्वे देवासः" इत्यादि मन्त्रले विश्वेदेवको आवाहन गरोस्।

६६. अनि श्राद्ध गर्नेले साँइलि-माज्जि-र-बुडि उम्लाले तिल लिएर चुपै लागेर वैश्वदेवश्राद्ध गर्ने स्थलमा तिल छरोस्।

[६७]("ओ३म् यवोऽसि यवयाऽस्मद् द्वेषो यवयाऽरातीः" इति मन्त्रेण श्राद्धदेशे यवान् वा विकिरेत्।)

[६८]**ततः श्राद्धकर्ता उत्तिष्ठन्नेव "ओ३म् विश्श्वें देवाः शृणुतेम६ हवंम् मे येऽ अन्तरिक्क्षे यऽ उपद्द्यवि ष्ठ। येऽ अंग्गँनिजिह्व्वाऽ उत वा यजंत्त्राऽ आसद्द्याऽस्म्मिन्न् बर्हिर्षि मादयद्ध्वम्" इति उदात्तादिकण्ठस्वरसहिततया जपेत्।**

("ओ३म् आगच्छन्तु महाभागा विश्वे देवा महाबलाः। ये अत्र विहिता श्राद्धे सावधाना भवन्तु ते" इति च पठेत्।)

(पित्रावाहनम्)

[६९]**ततः श्राद्धकर्ता उपविश्य** प्राचीनावीती **भूत्वा पितृब्राह्मणं मातामहब्राह्मणं च**

---

६७. *"ओ३म् यवोसि" इत्यादि मन्त्रले वैश्वदेवश्राद्ध गर्ने ठाममा जौ छरोस्।*

६८. अनि श्राद्ध गर्नेले उठेरै "ओ३म् विश्वे देवाः" इत्यादि मन्त्र उदात्तादिकण्ठस्वरसहित (द्वित्त्वादिसमेत) जपोस्।

६९. अनि श्राद्ध गर्नेले बसेर प्राचीनावीति (अपसव्य) भएर पितृब्राह्मणसित र मातामहब्राह्मणसित पितृको आवाहन गर्ने अनुमति मागोस्।

"ओ३म् पितॄनावाहयिष्ये" इति पृच्छेत्।

("ओ३म् अस्मत्पितृ-पितामह-प्रपितामहान् ....शर्म-..........शर्म-..........शर्मणः .... गोत्रान् वसु-रुद्रा-ऽऽदित्यस्वरूपान् तथा अस्मन्मातामह-प्रमातामह-वृद्धप्रमातामहान् ....शर्म-.......... शर्म-..........शर्मणः ....गोत्रान् वसु-रुद्रा-ऽऽदित्यस्वरूपान् अद्य कर्तव्ये भाद्रपदाऽपरपक्षरूप-महालयान्तर्गते पार्वणश्राद्धे आवाहयिष्ये" इति पृच्छेत्।)

[७०]पितृब्राह्मणो मातामहब्राह्मणश् च "ओ३म् आवाहय" इत्यनुजानीयाताम्।

[७१]ततः श्राद्धकर्ता उत्थाय "ओ३म् उशन्तस् त्वा निधीमह्युशन्तः समिधीमहि। उशन्नुशतऽ आवह पितॄन् हविषेऽ अत्तवे" इति पित्रादीन् मातामहादींश् च पितॄनावाहयेत्।

---

७०. पितृब्राह्मणले र मातामहब्राह्मणले अनुमति दिउन्।

७१. अनि श्राद्ध गर्नेले उठेर "ओ३म् उशन्तस् त्वा" इत्यादि मन्त्रले पित्रादि र मातामहादि पितृहरुको आवाहन गरोस्।

[७२]ततः श्राद्धकर्ता मध्यमाप्रदेशिन्यङ्गुष्ठैस् तिलानादाय पित्रादिश्राद्धदेशे माता-महादिश्राद्धदेशे च तूष्णीम् एवाऽपसव्यं तिलान् अवकिरेत्।

("ओ३म् अपहताऽ असुरा रक्षाᳬंसि वेदिषदः" इति मन्त्रेण श्राद्धदेशे तिलान् विकिरेत्।)

[७३]ततः श्राद्धकर्ता उत्तिष्ठन्नेव "ओ३म् आ यंन्तु नः पितरंः सोम्म्यासों-ऽग्गिंनष्वात्ताः पथिभिर्द्देवयानैंः। अस्मिन्न्यज्ज्ञे स्वधया मदन्तोऽधिंब्ब्रुवन्तु ते-ऽवन्त्वस्म्मान्" इति मन्त्रं जपेत्।

[७४](तत उपविश्य **उपवीती** भूत्वा "ओ३म् हस्तार्घपात्रमहं करिष्ये" इति वैश्वदेविकब्राह्मणं पृच्छेत्। वैश्वदेविकब्राह्मणश् च "ओ३म् कुरुष्व" इति प्रतिब्रूयात्)।

---

७२. अनि श्राद्ध गर्नेले माज्जि-चोरि-बुडिउम्लाहरुले तिल लिएर पित्रादि-मातामहादिका श्राद्धका देशमा (ठाममा) चुपैलागेर अपसव्य रीतिले तिल छरोस्।

७३. अनि श्राद्ध गर्नेले उठेरै "ओ३म् आ यन्तु" इत्यादि मन्त्र उदात्तादिकण्ठस्वरसहित जपोस्।

७४. *अनि बसेर उपवीति (सव्य) भएर हस्तार्घपात्र बनाउन वैश्वदेवब्राह्मणसित अनुमति मागोस्। वैश्वदेवब्राह्मणले अनुमति दिउन्।*

(हस्तार्घपात्रकरणम्)

[७५]**ततः श्राद्धकर्ता उपविश्य** उपवीती **भूत्वाऽप उपस्पृश्य उदङ्मुखो वैश्वदेविकब्राह्मणस्याऽग्रे यज्ञियवृक्षचमसादिकं पत्रपुटकं वा प्रागग्रं भूमौ निधाय तत्र तूष्णीमेव** ("ओ३म् पवित्रे स्थो वैष्णव्यौ सवितुर् वः प्रसवऽ उत्पुनाम्यच्छिद्रेण सूर्यस्य रश्मिभिः" इति मन्त्रेण) **पूर्वाग्रं यथोक्तरूपं पवित्रं धारयित्वा उदपात्रमादाय "ओ३म् शन् नो देवीरभिष्टयऽ आपो भवन्तु पीतये। शंय् योरभिस्रवन्तु नः" इति मन्त्रेण देवतीर्थानुगतमुखेनोदपात्रेण पवित्रोपरि पात्रे अप आसिञ्चेत्।**

[७६]**ततः श्राद्धकर्ता** प्राचीनावीती **भूत्वा दक्षिणाभिमुखः** ("ओ३म् हस्तार्घपात्राण्यहं

---

७५. अनि श्राद्ध गर्नेले बसेर उपवीति (सव्य) भएर आचमन गरेर उत्तरतिर फर्केर वैश्वदेविकब्राह्मणका अगाडि पूर्वाग्र (पूर्वतिर टुप्पो फर्केको) कानेदुनो राखेर तेसमा *("ओ३म् पवित्रे स्थः" इत्यादि मन्त्रले)* पूर्वाग्र (पूर्वतिर टुप्पो फर्केको) पवित्र राखेर तेसमा "ओ३म् शन् नो देवीः" इत्यादि मन्त्रले देवतीर्थसित मुख मिलेको जलपात्रले जल हालोस्।

७६. अनि श्राद्ध गर्नेले प्राचीनावीति (अपसव्य) भएर दक्षिणतिर फर्केर *(पितृब्राह्मणहरूसित हस्तार्घपात्र बनाउन अनुमति मागोस्,*

करिष्ये" इति पित्रादिब्राह्मणौ पृच्छेत्। पित्रादिब्राह्मणौ च "ओ३म् कुरुष्व" इत्यनुजानीयाताम्। ततः) **पितृब्राह्मणस्याऽग्रे भूमौ पित्राद्यर्घार्थानि दक्षिणाग्राणि प्राक्संस्थानि त्रीणि, मातामह-ब्राह्मणस्याऽग्रे च भूमौ मातामहाद्यर्घार्थानि दक्षिणाग्राणि प्राक्संस्थानि त्रीणि यज्ञिय-वृक्षचमसादिपात्राणि पत्रपुटकानि वा निधाय तेषु तूष्णीमेव** ("ओ३म् पवित्रे स्थो वैष्णव्यौ सवितुर् वः प्रसवऽ उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः" इति मन्त्रेण मन्त्रावृत्या) **यथोक्त-रूपाणि दक्षिणाग्राणि पवित्राणि क्रमेण धारयित्वा उदपात्रमादाय "ओ३म् शन् नो देवीरभिष्टयऽ आपो भवन्तु पीतये। शंय् योरभिस्रवन्तु नः" इति मन्त्रेण पितृतीर्थानुगत-मुखेन उदपात्रेण पवित्रोपरि अर्घपात्रेषु प्रतिपात्रं मन्त्रावृत्त्या क्रमेण अप आसिञ्चेत्।**

पितृब्राह्मणहरूले अनुमति दिउन्। अनि) पित्रादिका लागि तिन र मातामहादिका लागि तिन दक्षिणाग्र (दक्षिणतिर टुप्पो फर्काएका) कानेदुनाहरु तिति ब्राह्मणका अगाडि राखेर तिनमा मन्त्र नपढिकन *("ओ३म् पवित्रे स्थ" इत्यादि मन्त्रले पात्र-पिच्छे मन्त्र दोहोऱ्याउँदै)* दक्षिणाग्र (दक्षिणतिर टुप्पो फर्केका) पवित्रहरु क्रमैले राखेर "ओ३म् शन् नो देवीः" इत्यादि मन्त्र दोहोऱ्याउँदै दुनाहरुमा पवित्रमाथि पितृतीर्थसित मुख मिलेका जलपात्रले जल हालोस्।

[७७]**ततः श्राद्धकर्ता** उपवीती **भूत्वा उदङ्मुखोऽप उपस्पृश्याऽनामिकामध्यमाङ्गुष्ठैस् तिलानादाय "ओ३म् तिलोऽसि सोमदैवत्यो गोसवो देवनिर्मितः। प्रत्नमद्भिः पृक्तः स्वधया पितॄलँ् लोकान् प्रीणाहि नः स्वाहा" इति मन्त्रेण वैश्वदेवार्घपात्रे प्राऽसव्यं तिलानावपेत्।**

[७८]("ओ३म् श्रीश् च ते लक्ष्मीश् च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणाऽमुम् मऽ इषाण सर्वलोकम् मऽ इषाण" इति मन्त्रेण पुष्पम्; "ओ३म् गन्धद्वारान् दुराधर्षान् नित्यपुष्टाङ् करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्" इति गन्धं चाऽर्घपात्रे प्रक्षिपेत्।)

[७९]**ततः** प्राचीनावीती **भूत्वा दक्षिणाभिमुखः श्राद्धकर्ता मध्यमातर्जन्यङ्गुष्ठैस्**

---

७७. अनि श्राद्ध गर्नेले उपवीति (सव्य) भएर उत्तरतिर फर्केर आचमन गरेर साँइलि-माज्जि-बुडि उम्लाले तिल लिएर "ओ३म् तिलोऽसि" इत्यादि मन्त्रले वैश्वदेव अर्घपात्रमा सुल्टो गरेर (दाइनेतिरबाट देउरेतिर हाल्ने गरेर) तिल हालोस्।

७८. *अनि "श्रीश् च ते" इत्यादि मन्त्रहरुको उच्चारण गरेर फुल र चन्दन पनि अर्घपात्रमा हालोस्।*

७९. अनि श्राद्ध गर्नेले जनै र उपर्ना दाइने काँदमा राखेर (प्राचीनावीति [अपसव्य] भएर) दक्षिणतिर फर्केर माज्जि-चोरि-बुडि-

तिलानादाय "ओ३म् तिलोऽसि सोमदैवत्यो गोसवो देवनिर्मितः। प्रत्नमद्भिः पृक्तः स्वधया पितॄलँ् लोकान् प्रीणाहि नः स्वाहा" इति मन्त्रेण पित्राद्यर्घपात्रेषु मातामहाद्यर्घपात्रेषु च क्रमेण प्रतिपात्रं मन्त्रावृत्त्याऽपसव्यं तिलानावपेत्।

[८०]("ओ३म् श्रीश् च ते लक्ष्मीश् च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणाऽमुम् मऽ इषाण सर्वलोकम् मऽ इषाण" इति मन्त्रेण पुष्पम्; "ओ३म् गन्धद्वारान् दुराधर्षान् नित्यपुष्टाङ्करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्" इति गन्धं चाऽर्घपात्रेषु मन्त्रावृत्या प्रक्षिपेत्।)

[८१](तत **उपवीती** भूत्वा "ओ३म् हस्ताऽर्घपात्रं सम्पन्नम्" इति वैश्वदेविकब्राह्मणं पृच्छेत्, वैश्वदेविक-

---

उम्लाहरुले तिल लिएर "ओ३म् तिलोसि" इत्यादि मन्त्रले देउरेतिरबाट दाइनेतिर फाल्ने गरेर पित्रादिका अर्घपात्रहरुमा मन्त्र दोहोऱ्याउँदै क्रमशः तिल हालोस्।

८०. *अनि "श्रीश् च ते" इत्यादि मन्त्रहरुको उच्चारण गरेर फुल र चन्दन पनि हालोस्।*

८१. *अनि श्राद्ध गर्नेले उपवीति (सव्य) भएर "ओ३म् हस्तार्घपात्रं सम्पन्नम् ?" भनेर वैश्वदेविकब्राह्मणलाइ सोदोस्, ति ब्राह्मणले "ओ३म् सुसम्पन्नम्" भनुन्। अनि श्राद्ध गर्नेले "ओ३म् हस्तार्घपात्रमुत्थापयामि" भनेर अर्घपात्र उठाउन वैश्वदेविकब्राह्मणसित अनुमति मागोस्। ति ब्राह्मणले "ओ३म् उत्थापयस्व" भनेर अर्घपात्र उठाउन अनुमति दिउन्।*

ब्राह्मणश् च "ओ३म् सुसम्पन्नम्" इति प्रतिब्रूयात्, ततः "ओ३म् हस्ताऽर्घपात्रम् उत्थापयामि" इति वैश्वदेविकब्राह्मणं पृच्छेत्, वैश्वदेविकब्राह्मणश् च "ओ३म् उत्थापयस्व" इति प्रतिब्रूयात्)।

(हस्तार्घदानम्)

[८२]**ततः श्राद्धकर्ता उपवीती भूत्वा उदङ्मुखोऽप उपस्पृश्य कुशाङ्गुरीयकमनामिकामध्यपर्वणि धृत्वा पवित्रपाणिरासीन एव दक्षिणहस्तेन वैश्वदेवार्घपात्रमुत्थाप्य वामहस्ते कृत्वा तत्पात्रस्थं पवित्रं दक्षिणहस्तेन गृहीत्वा** ("ओ३म् नमो नारायणाय" इति **प्राङ्मुखं ... **) **प्रागग्रतया वैश्वदेविकब्राह्मणदक्षिणहस्ते प्राऽसव्यं स्थापयित्वा** (वामहस्तस्थार्घमन्त्रेण)

---

८२. अनि श्राद्ध गर्नेले उपवीति (सव्य) भएर उत्तरतिर फर्केर आचमन गरेर कुशको मुन्द्रो साँइलि उम्लाका माजाका पर्वमा लाएर कुशयुक्तहस्त भएर बसेरै दाइने हातले वैश्वदेवार्घपात्र उठाएर देउरे हातमा राखि तेस पात्रको पवित्र दाइने हातले लिएर पूर्वतिर टुप्पो पारेर *("ओ३म् नमो नारायणाय" भन्ने मन्त्रले)* वैश्वदेविकब्राह्मणका दाइने हातमा सव्य रीतिले राखेर *(देउरे हातमा रएको अर्घपात्रलाइ घोउटो दाइने हातले छोपेर)* "ओ३म् सा दिव्याः" इत्यादि मन्त्र पडेर (कुश-यव-जल लिएर) अर्घपात्र दाइने हातले लिएर "ओ३म् मासिकाऽपरपक्ष" इत्यादि वाक्य भनेर देवतीर्थले वैश्वदेविकब्राह्मणका हातमा पवित्रमाथि अर्घ देओस्। अर्घपात्र वैश्वदेविकब्राह्मणका दाइनेतिर उत्तानै राखोस्। वैश्वदेविकब्राह्मणले आँफ्नो हातको पवित्र तेस पात्रमा राखुन्।

पात्रमुखमधोमुखदक्षिणहस्तेन पिधाय) **"ओ३म् या दिव्याऽ आपः पयसा सम्बभूवुर् याऽ अन्तरिक्ष्याऽ उत पार्थवीर् याः। हिरण्यवर्णा यज्ञियास् ता नऽ आपः शिवाः शꣳ स्योनाः सुहवा भवन्तु" इति पठित्वा** (कुशयवजलान्यादाय) **अर्घपात्रं दक्षिणहस्तेनादाय "ओ३म् मासिकाऽपरपक्षश्राद्धाऽनुकल्परूप-नभस्याऽपरपक्षरूप-महालयप्रयुक्तपित्रादिश्राद्ध-मातामहादिश्राद्धसम्बन्धिनो विश्वेदेवा एष वोऽर्घः" इत्युक्त्वा देवतीर्थेन वैश्वदेविक-ब्राह्मणहस्ते पवित्रोपरि अर्घं दद्यात्। सर्वेषु अर्घदानेषु अर्घपात्रेषु संस्रवमवशेषयेत्। तद् अर्घपात्रं वैश्वदेविकब्राह्मणदक्षिणभागे उत्तानमेव निदध्यात्। वैश्वदेविक-ब्राह्मणोऽपि स्वहस्तस्थं पवित्रं तस्मिन् पात्रे निक्षिपेत्।**

[८३](ततः **प्राचीनावीती** भूत्वा "ओ३म् हस्तार्घपात्राणि सम्पन्नानि" इति पित्रादिब्राह्मण-मातामहादि-

---

८३. *अनि श्राद्ध गर्नेले प्राचीनावीति (अपसव्य) भएर "ओ३म् हस्तार्घपात्राणि सम्पन्नानि" भनेर पितृब्राह्मण-मातामहब्राह्मणहरुलाइ सोदोस्, अनि ति ब्राह्मणहरुले "ओ३म् सम्पन्नानि" भनुन्। अनि श्राद्ध गर्नेले "ओ३म् हस्तार्घपात्राणि उत्थापयामि" भनेर ति*

ब्राह्मणौ पृच्छेत्, तौ ब्राह्मणौ च "ओ३म् सुसम्पन्नानि" इति प्रतिब्रूयाताम्, ततः "ओ३म् हस्तार्घपात्राणि उत्थापयामि" इति तौ ब्राह्मणौ पृच्छेत्, तौ ब्राह्मणौ च "ओ३म् उत्थापयस्व" इति प्रतिब्रूयाताम्)।

[८४] **(१) ततः** प्राचीनावीती **भूत्वा दक्षिणाभिमुखः श्राद्धकर्ता पवित्रपाणिरासीन एव दक्षिणहस्तेन पित्रर्घपात्रमुत्थाप्य वामहस्ते कृत्वा तत्पात्रस्थं पवित्रं दक्षिण-हस्तेनाऽऽदाय दक्षिणाग्रतया** ("ओ३म् नमो नारायणाय" इति मन्त्रेण) **अपसव्यं पितृब्राह्मण-दक्षिणहस्ते स्थापयित्वा** (वामहस्तस्थार्घपात्रमुखमुत्तानदक्षिणहस्तेन पिधाय) **"ओ३म् या**

ब्राह्मणहरुसित अर्घपात्रहरु उठाउन अनुमति मागोस् र ति ब्राह्मणहरुले "ओ३म् उत्थापयस्व" भनेर अनुमति दिउन्।

८४. अनि श्राद्ध गर्नेले प्राचीनावीति (अपसव्य) भएर दक्षिणतिर फर्केर पवित्रयुक्त हातवाला भएर बसेरै दाइने हातले पितृको अर्घ-पात्र उठाएर देउरे हातमा राखेर तेस पात्रको पवित्र दाइने हातले लिएर *("ओ३म् नमो नारायणाय" भन्ने मन्त्रले)* अपसव्य रीतिले पितृब्राह्मणका दाइने हातमा दक्षिणतिर टुप्पो पारि राखेर *(देउरे हातमा रएको अर्घपात्रलाइ उत्तानो दाइने हातले छोपेर)* "ओ३म् या दिव्या" इत्यादि मन्त्र पडेर *(मोटकतिलजलहरु लिएर)* अर्घपात्र दाइने हातले लिएर "ओ३म् अस्मत् पितर्" इत्यादि वाक्य पडेर पितृतीर्थले पितृब्राह्मणका हातमा पवित्रमाथि अर्घ देओस्। अर्घ दिंदा सबै अर्घदानमा अर्घपात्रहरुमा अलि-अलि निथार अवशिष्ट (बाँकि) राखोस्। अर्घपात्र आँफ्ना ठाममा भैंमा राखोस्। पितृब्राह्मणले त्यो पवित्र नेसै अर्घपात्रमा राखुन्।

दिव्याऽ आपः पयसा सम्बभूवुर् याऽ अन्तरिक्ष्याऽ उत पार्थवीर् याः। हिरण्यवर्णा यज्ञियास् ता नऽ आपः शिवाः श॰ स्योनाः सुहवा भवन्तु" इति पठित्वा (मोटकतिल-जलान्यादाय) तदर्घपात्रं दक्षिणहस्तेनाऽऽदाय "ओ३म् अस्मत्पितः ....शर्मन् ....गोत्र वसुस्वरूप एष तेऽर्घः" इत्युक्त्वा पितृतीर्थेन पितृब्राह्मणहस्ते पवित्रोपरि अर्घं दद्यात्। सर्वेषु अर्घदानेषु अर्घपात्रेषु संस्रवमवशेषयेत्। अर्घपात्रं यथास्थानं भूमौ निदध्यात्। पितृब्राह्मणोऽपि तत् पवित्रं तस्मिन् पात्रे निक्षिपेत्।

[८५](२) ततस् तथैव पितामहार्घपात्रमुत्थाप्य वामहस्ते कृत्वा तत्पात्रस्थं पवित्रं दक्षिणहस्तेनाऽऽदाय दक्षिणाग्रतया ("ओ३म् नमो नारायणाय" इति मन्त्रेण) अपसव्यं पितृ-ब्राह्मणदक्षिणहस्ते स्थापयित्वा (वामहस्तस्थार्घपात्रमुखमुत्तानदक्षिणहस्तेन पिधाय) "ओ३म्

---

८५. अनि तेसै गरि पितामहको अर्घ उठाइ सबै कुरा उक्तरीतिले नै गरि पितामहलाइ पितृब्राह्मणका हातमा पवित्रमाथि अर्घ देओस्। अर्घपात्र आँफ्ना ठाममा भैंमा राखोस्। पितृब्राह्मणले पनि त्यो पवित्र तेसै अर्घपात्रमा राखुन्।

सा दिव्याऽ आपः पयसा सम्बभूवुर् याऽ अन्तरिक्ष्याऽ उत पार्थवीर् याः। हिरण्यवर्णा यज्ञियास् ता नऽ आपः शिवाः शꣳ स्योनाः सुहवा भवन्तु" इति पठित्वा (मोटकतिल-जलान्यादाय) तदर्घपात्रं दक्षिणहस्तेनाऽऽदाय "ओ३म् अस्मत्पितामह ....शर्मन् ....गोत्र रुद्रस्वरूप एष तेऽर्घः" इत्युक्त्वा पितृतीर्थेन पितृब्राह्मणहस्ते पवित्रोपरि अर्घं दद्यात्। तदर्घपात्रं यथास्थानं भूमौ निदध्यात्। पितृब्राह्मणोऽपि तत् पवित्रं तस्मिन् पात्रे निक्षिपेत्।

[८६](३) ततस् तथैव प्रपितामहार्घपात्रमुत्थाप्य वामहस्ते कृत्वा तत्पात्रस्थं पवित्रं दक्षिणहस्तेनाऽऽदाय दक्षिणाग्रतया ("ओ३म् नमो नारायणाय" इति मन्त्रेण) अपसव्यं पितृब्राह्मणदक्षिणहस्ते स्थापयित्वा (वामहस्तस्थार्घपात्रमुखमुत्तानदक्षिणहस्तेन पिधाय)

---

८६. अनि तेसै गरि प्रपितामहको अर्घपात्र उठाइ सबै कुरा पूर्वोक्त रीतिले नै गरि प्रपितामहलाइ पितृब्राह्मणका हातमा पवित्रमाथि अर्घ देओस्। अर्घपात्र आँफ्ना ठाममा भैंमा राखोस्। पितामहब्राह्मणले पनि पवित्र तेसै अर्घपात्रमा राखुन्।

“ओ३म् या दिव्याऽ आपः पयसा सम्बभूवुर् याऽ अन्तरिक्ष्याऽ उत पार्थवीर् याः। हिरण्यवर्णा यज्ञियास् ता नऽ आपः शिवाः शꣳ स्योनाः सुहवा भवन्तु” इति पठित्वा (मोटकतिलजलान्यादाय) तदर्घपात्रं दक्षिणहस्तेनाऽऽदाय “ओ३म् अस्मत्प्रपितामह ....शर्मन् ....गोत्र आदित्यस्वरूप एष तेऽर्घः” इत्युक्त्वा पितृतीर्थेन पितृ-ब्राह्मणहस्ते पवित्रोपरि अर्घं दद्यात्। तदर्घपात्रं यथास्थानं भूमौ निदध्यात्। पितृ-ब्राह्मणोऽपि तत् पवित्रं तस्मिन् पात्रे निक्षिपेत्।

[८७](४) ततस् तथैव मातामहार्घपात्रमुत्थाप्य वामहस्ते कृत्वा तत्पात्रस्थं पवित्रं दक्षिणहस्तेनाऽऽदाय दक्षिणाग्रतया (“ओ३म् नमो नारायणाय” इति मन्त्रेण) अपसव्यं मातामहब्राह्मणदक्षिणहस्ते स्थापयित्वा (वामहस्तस्थार्घपात्रमुखमुत्तानदक्षिणहस्तेन पिधाय)

---

८७. अनि पूर्वोक्त रीतिले नै मातामहको अर्घपात्र उठाइ सबै कुरा पूर्वोक्त रीतिले नै गरि मातामहलाइ मातामहब्राह्मणका हातमा पवित्रमाथि अर्घ देओस्। अर्घपात्र आँफ्ना ठाममा भैंमा राखोस्। मातामहब्राह्मणले पनि त्यो पवित्र तेसै अर्घपात्रमा राखुन्।

"ओ३म् या दिव्याऽ आपः पयसा सम्बभूवुर् याऽ अन्तरिक्ष्याऽ उत पार्थवीर् याः। हिरण्यवर्णा यज्ञियास् ता नऽ आपः शिवाः शꣳ स्योनाः सुहवा भवन्तु" इति पठित्वा (मोटकतिलजलान्यादाय) तदर्घपात्रं दक्षिणहस्तेनाऽऽदाय "ओ३म् अस्मन्मातामह ....शर्मन् ....गोत्र वसुस्वरूप एष तेऽर्घः" इत्युक्त्वा पितृतीर्थेन मातामह-ब्राह्मणहस्ते पवित्रोपरि अर्घं दद्यात्। तदर्घपात्रं यथास्थानं भूमौ निदध्यात्। मातामहब्राह्मणोऽपि तत् पवित्रं तस्मिन् पात्रे निक्षिपेत्।

[८८](५) ततस् तथैव प्रमातामहार्घपात्रमुत्थाप्य वामहस्ते कृत्वा तत्पात्रस्थं पवित्रं दक्षिणहस्तेनाऽऽदाय दक्षिणाग्रतया ("ओ३म् नमो नारायणाय" इति मन्त्रेण) अपसव्यं मातामहब्राह्मणदक्षिणहस्ते स्थापयित्वा (वामहस्तस्थार्घपात्रमुखमुत्तानदक्षिणहस्तेन पिधाय)

---

८८. अनि पूर्वोक्त रीतिले नै प्रमातामहको अर्घपात्र उठाइ सबै कुरा पूर्वोक्त रीतिले नै गरि प्रमातामहलाइ मातामहब्राह्मणका हातमा पवित्रमाथि अर्घ देओस्। अर्घपात्र आँफ्ना ठाममा भैंमा राखोस्। मातामहब्राह्मणले पनि त्यो पवित्र तेसै अर्घपात्रमा राखुन्।

"ओ३म् या दिव्याऽ आपः पयसा सम्बभूवुर् याऽ अन्तरिक्ष्याऽ उत पार्थवीर् याः। हिरण्यवर्णा यज्ञियास् ता नऽ आपः शिवाः शꣳ स्योनाः सुहवा भवन्तु" इति पठित्वा (मोटकतिलजलान्यादाय) तदर्घपात्रं दक्षिणहस्तेनाऽऽदाय "ओ३म् अस्मत्प्रमातामह ....शर्मन् ....गोत्र रुद्रस्वरूप एष तेऽर्घः" इत्युक्त्वा पितृतीर्थेन मातामह-ब्राह्मणहस्ते पवित्रोपरि अर्घं दद्यात्। तदर्घपात्रं यथास्थानं भूमौ निदध्यात्। माता-महब्राह्मणोऽपि तत् पवित्रं तस्मिन् पात्रे निक्षिपेत्।

[८९](६) ततस् तथैव वृद्धप्रमातामहार्घपात्रमुत्थाप्य वामहस्ते कृत्वा तत्पात्रस्थं पवित्रं दक्षिणहस्तेनाऽऽदाय दक्षिणाग्रतया ("ओ३म् नमो नारायणाय" इति मन्त्रेण) अपसव्यं मातामहब्राह्मणदक्षिणहस्ते स्थापयित्वा (वामहस्तस्थार्घपात्रमुखमुत्तानदक्षिणहस्तेन पिधाय)

---

८९. अनि पूर्वोक्त रीतिले नै वृद्धप्रमातामहको अर्घपात्र उठाइ सबै कुरा पूर्वोक्त रीतिले नै गरि वृद्धप्रमातामहलाइ मातामहब्राह्मणका हातमा पवित्रमाथि अर्घ देओस्। अर्घपात्र आँफ्ना ठाममा भैंमा राखोस्। मातामहब्राह्मणले पनि त्यो पवित्र तेसै अर्घपात्रमा राखुन्।

"ओ३म् या दिव्याऽ आपः पयसा सम्बभूवुर् याऽ अन्तरिक्ष्याऽ उत पार्थवीर् याः। हिरण्यवर्णा यज्ञियास् ता नऽ आपः शिवाः शꣳ स्योनाः सुहवा भवन्तु" इति पठित्वा (मोटकतिलजलान्यादाय) तदर्घपात्रं दक्षिणहस्तेनाऽऽदाय "ओ३म् अस्मद्वृद्धप्रमातामह ....शर्मन् ....गोत्र आदित्यस्वरूप एष तेऽर्घः" इत्युक्त्वा पितृतीर्थेन मातामहब्राह्मणहस्ते पवित्रोपरि अर्घं दद्यात्। तदर्घपात्रं यथास्थानं भूमौ निदध्यात्। मातामहब्राह्मणोऽपि तत् पवित्रं तस्मिन् पात्रे निक्षिपेत्।

[१०]ततः पित्राद्यर्घपात्राणां संस्रवान् क्रमेण प्रथमेऽर्घपात्रे (वैश्वदेविकार्घपात्रे) समवनीय पवित्राणि च तस्मिन्नेव पात्रे दक्षिणाग्रतयैव निदध्यात्।

---

१०. अनि पित्रादिका सबै अर्घपात्रहरुका संस्रवहरु (निथारहरु) क्रमैले पैलो अर्घपात्रमा (वैश्वदेव अर्घपात्रमा) निथारेर पवित्रहरु पनि तेसै पात्रमा दक्षिणतिर टुप्पो पारेर एकत्र गरेर राखोस्।

(चक्षुःस्पर्शः)

[९१](तत आयुष्कामः श्राद्धकर्ता **उपवीती** भूत्वा तदर्घपात्रस्थजलेन अङ्गुष्ठाऽनामिकाभ्यां गृहीतेन "ओ३म् तच् चक्षुर् देवहितम् पुरस्ताच् छुक्रमुच्चरत्। पश्येम शरदः शतञ् जीवेम शरदः शतꣳ शृणुयाम शरदः शतम् प्र ब्रवाम शरदः शतमदीनाः स्याम शरदः शतम् भूयश् च शरदः शतात्" इति मन्त्रेण चक्षुषी स्पृशेत्। ततः **प्राचीनावीती** भवेत्)।

(पात्रन्युब्जीकरणम्)

[९२]**ततः सपवित्रं तत् पात्रम् "ओ३म् पितृभ्य स्थानमसि" इति मन्त्रेण वैश्वदेविकब्राह्मण-पितृब्राह्मणयोर् मध्ये दक्षिणाग्रतयाऽपसव्यं न्युब्जं निदध्यात्** (तदुपरि कुशत्रयं दद्यात्)।

---

९१. *अनि लामो आयु चाहाने श्राद्धकर्ताले जनै र उपर्ना देउरे काँदमा पारेर (सव्य भएर) अर्घपात्रका बुडिउम्ला-र-साइँलिउम्लाले लिइएका जलले "ओ३म् तच् चक्षुर्" इत्यादि मन्त्रले आँखा छोओस्। अनि जनै र उपर्ना दाइने काँदमा पारोस् (प्राचीनावीति [अपसव्य] होओस्)।*

९२. अनि पवित्रहरुले युक्त त्यो (वैश्वदेव अर्घको) पात्र "ओ३म् पितृभ्य स्थानमसि" एस मन्त्रले वैश्वदेविकब्राह्मणका र पितृब्राह्मणका माजागा दक्षिणतिर टुप्पो पारेर अपसव्य रीतिले घोउटो पारेर राखोस् *(तेसमाथि तिन कुश राखोस्)*।

(ब्राह्मणेषु देवपितृपूजनम्)

[९३]**अत्राऽवसरे** ("ओ३म् अर्चयिष्ये" इति ब्राह्मणान् पृच्छेत्, ब्राह्मणाश् च "ओ३म् अर्चय" इति प्रतिब्रूयुः) **श्राद्धकर्ता** उपवीती **भूत्वा उदङ्मुखोऽप उपस्पृश्य पवित्रपाणिरासीन एव पातितदक्षिणजानुस् तूष्णीमेव वैश्वदेविकब्राह्मणाय देवतीर्थेन गन्ध-पुष्प-धूप-दीप-वाससां च प्राऽसव्यं प्रदानं कुर्यात्।**

[९४](वैश्वदेविककर्मपात्रकुशतिलजलान्यादाय "ओ३म् अस्मत्पितृ-पितामह-प्रपितामहानाम् .... शर्म-..........शर्म-..........शर्मणाम् ....गोत्राणां वसु-रुद्रा-ऽऽदित्यस्वरूपाणां तथा अस्मन्मातामह-प्रमातामह-वृद्धप्रमातामहानाम् ....शर्म-.......शर्म-.......शर्मणाम् ....गोत्राणां वसु-रुद्रा-ऽऽदित्यस्वरूपा-

---

९३. एस अवसरमा श्राद्ध गर्नेले *(पूजा गर्नेछु भनेर ब्राह्मणहरुसित अनुमति मागोस्, ब्राह्मणहरुले अनुमति दिउन्)* उपवीति (सव्य) भएर उत्तरतिर फर्केर आचमन गरेर पवित्रयुक्तहस्त भएर बसेरै दाइने घुँडो भूमिसंलग्न गरेर चुपै लागेर वैश्वदेविकब्राह्मण-लाइ देवतीर्थले चन्दन, पुष्प (फुल), धूप, दीप, वस्त्र सव्य रीतिले देओस्।

९४. *वैश्वदेविककर्मपात्रबाट कुशतिलजलहरु लिएर "ओ३म् अस्मत्पितृ" इत्यादि वाक्य पडेर कुशादि छोडोस् र अर्चनाविधि पूर्ण होस् भनेर वैश्वदेविकब्राह्मणका हातमा जल देओस्, ति ब्राह्मणले परिपूर्ण होओस् भनुन्।*

णाम् अद्यकर्तव्ये भाद्रपदापरपक्षरूपमहालयान्तर्गते पार्वणश्राद्धे तच्छ्राद्धसम्बन्धिनो विश्वेदेवा पुरूरवो-माद्रवोनामान एतानि गन्ध-पुष्प-धूप-दीप-वासांसि वः स्वाहा" इति कुशादिकमुत्सृजेत्, "ओ३म् अर्चन-विधेः सर्वं परिपूर्णमस्तु" इति वैश्वदेविकब्राह्मणकरे जलं दद्यात्, वैश्वदेविकब्राह्मणश् च "ओ३म् अस्तु परिपूर्णम्" इति ब्रूयात्।)

[९५]**ततः प्राचीनावीती भूत्वा दक्षिणाभिमुखः पातितवामजानुः पवित्रपाणिरासीन एव श्राद्धकर्ता तूष्णीमेव पितृब्राह्मणाय गन्ध-पुष्प-धूप-दीप-वाससां चाऽपसव्यं प्रदानं कुर्यात्।**

[९६](पित्र्यकर्मपात्रद्विगुणदर्भ(मोटक)तिलजलान्यादाय "ओ३म् अस्मत्पितृ-पितामह-प्रपितामहाः ....शर्म- ....शर्म- ....शर्माणः ....गोत्रा वसु-रुद्रा-ऽऽदित्यस्वरूपा अद्यकर्तव्ये भाद्रपदा-

---

९५. अनि श्राद्ध गर्नेले प्राचीनावीति (अपसव्य) भएर दक्षिणतिर फर्केर देउरे घुँडो भूमिसंलग्न गराएर कुशयुक्त हातवाला भएर बसेरै चुपैलागेर पितृब्राह्मणलाइ चन्दन, पुष्प (फुल), धूप, दीप, वस्त्र पनि अपसव्य रीतिले देओस्।

९६. *पित्र्यकर्मपात्रबाट मोटकतिलजल लिएर "ओ३म् अस्मत्पितृ" इत्यादि वाक्य पडेर कुशादि छोडोस् र अर्चनविधि पूर्ण होस् भनेर पितृब्राह्मणका हातमा जल देओस्, ति ब्राह्मणले परिपूर्ण होओस् भनुन्।*

ऽपरपक्षरूपमहालयान्तर्गतपार्वणश्राद्धे एतानि गन्ध-पुष्प-धूप-दीप-वासांसि त्रेधा विभज्य युष्मभ्यं स्वधा" इति द्विगुणदर्भा(मोटका)दिकमुत्सृजेत्, "ओ३म् अर्चनविधेः सर्वं परिपूर्णमस्तु" इति पितृब्राह्मणकरे जलं दद्यात्, पितृब्राह्मणश् च "ओ३म् अस्तु परिपूर्णम्" इति ब्रूयात्।)

[९७]ततस् तथैव मातामहब्राह्मणायाऽपि गन्ध-पुष्प-धूप-दीप-वाससां चाऽपसव्यं प्रदानं कुर्यात्।

[९८](पित्र्यकर्मपात्रद्विगुणदर्भ(मोटक)तिलजलान्यादाय "ओ३म् अस्मन्मातामह-प्रमातामह-वृद्ध-प्रमातामहाः ....शर्म- ....शर्म- ....शर्माणः ....गोत्रा वसु-रुद्रा-ऽऽदित्यस्वरूपा अद्यकर्तव्ये भाद्रपदापरपक्षरूपमहालयान्तर्गतपार्वणश्राद्धे एतानि गन्ध-पुष्प-धूप-दीप-वासांसि त्रेधा विभज्य युष्मभ्यं स्वधा" इति द्विगुणदर्भा(मोटका)दिकमुत्सृजेत्, "ओ३म् अर्चनविधेः सर्वं परिपूर्णमस्तु" इति मातामह-ब्राह्मणकरे जलं दद्यात्, मातामहब्राह्मणश् च "ओ३म् अस्तु परिपूर्णम्" इति ब्रूयात्।)

---

९७. अनि उक्त प्रकारले नै मातामहब्राह्मणलाइ पनि चन्दन फुल इत्यादि अपसव्य रीतिले देओस्।

९८. *पित्र्यकर्मपात्रबाट मोटकतिलजल लिएर "ओ३म् अस्मन्मातामह" इत्यादि वाक्य पडेर कुशादि छोडोस् र अर्चनविधि पूर्ण होस भनेर मातामहब्राह्मणका हातमा जल देओस्, ति ब्राह्मणले परिपूर्ण होओस् भनुन्।*

(अग्नौकरणम्)

[९९]ततः श्राद्धकर्ता वैश्वदेविकब्राह्मणस्याऽग्रतः किञ्चिद्दूरे प्राचीनावीती दक्षिणाभिमुखः पातितवामजानुरेवोपविश्य सुवर्णपात्रे वा रजतपात्रे वा पत्रपात्रे वा पिण्डनिर्माणायाऽपि प्रयोक्तुं योग्ये घृताक्तं प्रभूतमेवाऽन्नं पाकभाण्डादुद्धृत्य "ओ३म् अग्नौ करिष्ये" इति वैश्वदेविकब्राह्मण-पितृब्राह्मण-मातामहब्राह्मणान् पृच्छेत्। ततस् ते ब्राह्मणा अपि "ओ३म् कुरुष्व" इत्यनुजानीयुः।

[१००]ततः श्राद्धकर्ता स्वस्याऽग्रे भूमौ दक्षिणाग्रं पत्रपुटकं स्थापयित्वा तत्र अप

---

९९. अनि श्राद्ध गर्नेले वैश्वदेविकब्राह्मणका अगाडि केइ पर प्राचीनावीति (अपसव्य) भएर दक्षिणतिर फर्केर देउरे घुँडो भूमि-संलग्न गरेरै बसेर सुवर्णपात्रादि कुनै पिण्ड बनाउन पनि प्रयोगमा ल्याउन मिल्ने पात्रमा पकाएका भाँडामा नै घिउ चुआएर घृतयुक्त बनाइएको धेरै नै अन्न (भात) पकाएका भाँडाबाट झिकेर (पस्केर) "ओ३म् अग्नौ करिष्ये (होम्ने छु)" भनेर वैश्वदेविकब्राह्मण-पितृब्राह्मण-मातामहब्राह्मणहरुलाइ सोदोस्। अनि ति ब्राह्मणहरुले हुन्छ होम गर्नुहोस् भनि अनुमति दिउन्।

१००. अनि श्राद्ध गर्नेले आँफ्ना अगाडि भैंमा दक्षिणतिर टुप्पो पारेर दुनो राखेर तेसमा जल हालेर कुशहरुले तेस जलपात्रको

आसिच्य कुशैः परिस्तीर्य तत्रैवाऽप्सु "ओ३म् अग्नये कव्यवाहनाय स्वाहा" इति प्रथमामाहुतिं हुत्वा "ओ३म् सोमाय पितृमते स्वाहा" इति द्वितीयामाहुतिं जुहुयात्।

(भूस्वामिपितृभ्योऽन्नस्य दानम्)

[१०१](ततः श्राद्धकर्ता **प्राचीनावीती** भूत्वा- "ओ३म् यथा चक्रायुधो विष्णुस् त्रैलोक्यं परिरक्षति। एवं मण्डलभस्मैतत् सर्वभूतानि रक्षतु" इति हस्तच्योतितजलेन वामावर्तेन चतुष्कोणं मण्डलं विधाय द्विगुणदर्भ(मोटक)तिलजलानि हस्ते कृत्वा तदुपरि तिलघृतमधुजलयुताऽन्नवतीं पत्रपात्रीं निधाय "ओ३म् एतदन्नं सजलमेतद्भूस्वामिपितृभ्यो नमः" इत्युत्सृज्य ताम् अन्नपत्रपात्रीं मण्डलमध्ये निदध्यात्।)

परिस्तरण (यथाविधि चारैतिर कुश ओच्छ्याउने काम) गरि तिँहिँ जलमा "ओ३म् कव्यवाहनाय स्वाहा" भन्ने मन्त्रले प्रथम आहुति होमेर "ओ३म् सोमाय पितृमते स्वाहा" भन्ने मन्त्रले दोस्रो आहुति होमोस्।

१०१. *अनि जनै र उपर्ना दाइने काँदमा पारेर (अपसव्य भएर) श्राद्ध गर्नेले भैंमा वामावर्त गरि (देउरे हातपट्टि घुम्ने गरि) जलले "ओ३म् यथा चक्रायुधो विष्णुः" इत्यादि मन्त्रले चारकुने मण्डल बनाओस् र हातमा मोटक-तिल-जल लिएर तेसमाथि भूस्वामिपितृको तिल-घिउ-मह-जलले युक्त अन्नपात्र [सिदा] राखि त्यो भूस्वामि-पितृको अन्नपात्र [सिदा] "ओ३म् एतदन्नम्" इत्यादि वाक्य पडेर तेस मण्डलमा राखिदेओस्।*

(हुतशेषदानादिकम्)

१०२ ततः श्राद्धकर्ता उपवीती भूत्वा उदङ्मुखोऽप उपस्पृश्य पातितदक्षिणजानुः पवित्रपाणिरासीन एव वैश्वदेविकब्राह्मणभोजनपात्रे हुतशेषं किञ्चिदन्नमुद्धृत्य वैश्वदेविकब्राह्मणाय दत्त्वा (मधुनाऽभिघार्य) तदग्रे भूमौ उपनिहितं तद् वैश्वदेविक-ब्राह्मणभोजनपात्रम् (उत्तानाभ्याम् ऋजुभ्यां पाणिभ्याम्) आलभ्योत्सृज्य "ओ३म् पृथिवी ते पात्रन् द्यौरपिधानम् ब्राह्मणस्य मुखेऽ अमृतेऽ अमृतञ् जुहोमि स्वाहा" इति जपेत्। ततो वैश्वदेविक-ब्राह्मणस्य दक्षिणहस्तस्याऽङ्गुष्ठमादाय "ओ३म् इदंव् विष्णुर्

---

१०२. अनि श्राद्ध गर्नेले उपवीति (सव्य) भएर उत्तरतिर फर्केर आचमन गरेर दाइने घुँडो भूमिसंलग्न गरेर कुशयुक्त हातवाला भएर बसेरै होमेर रएको केइ अन्न वैश्वदेविकब्राह्मणका भोजनपात्रमा राखेर वैश्वदेविकब्राह्मणलाइ टक्र्याएर *(महले त्यो अन्न भिजाएर, तेस अन्नमा मह चुआएर)* वैश्वदेवब्राह्मणका अगाडि भूमिमा टक्र्याइएको त्यो वैश्वदेविकब्राह्मणको भोजन-पात्रलाइ *(सोजा [उत्ताना] हातहरुले)* छोएर छोडेर "ओ३म् पृथिवी" इत्यादि मन्त्र जपोस्। अनि वैश्वदेविकब्राह्मणको दाइने हातको बुडि उम्लो समातेर "ओ३म् इदंव् विष्णुर्" इत्यादि मन्त्रले त्यो बुडि उम्लालाइ घोउटो पारेर तेस अन्नमा गाडोस्।

विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पाँसुरे" इति मन्त्रेण न्युब्जं तं तस्मिन्नन्ने अवगाहयेत्।

[१०३]("ओ३म् इदमन्नम्" इत्यन्ने, "ओ३म् इमा आपः" इति जले, "ओ३म् इदमाज्यम्" इति घृते, "ओ३म् इदं हविः" इति पुनः अन्ने, "ओ३म् एतानि उपकरणानि" इति क्रमेण अन्न-जल-घृतादिषु वैश्वदेविकब्राह्मणदक्षिणाङ्गुष्ठम् अवगाहयेत्।)

[१०४]**ततोऽनामिकामध्यमाङ्गुष्ठैस् तिलानादाय "ओ३म् अपहताऽ असुरा रक्षाँसि वेदिषदः" इति मन्त्रेण साऽन्नपात्रं वैश्वदेविकब्राह्मणं वैश्वदेविकब्राह्मणाऽन्नपात्रमेव वा परितः प्रादक्षिण्येन तान् तिलान् प्रकिरेत्। ततोऽप उपस्पृशेत्।**

---

१०३. *"ओ३म् इदमन्नम्" इत्यादि वाक्यहरु पढ्दै अन्न, जल, घिउ इत्यादिमा वैश्वदेविकब्राह्मणको दाइने हातको बुडि उम्लो गाडोस्।*

१०४. अनि साँइलि-माज्जि-बुडिउम्लाहरुले तिल लिएर "ओ३म् अपहता" इत्यादि मन्त्रले अन्नपात्रसहित वैश्वदेवब्राह्मणका वा वैश्वदेवब्राह्मणका अन्नपात्रका ओरिपरि प्रदक्षिण रूपमा ति तिल छरोस्। अनि आचमन गरोस् (अथवा दाइने हातले पानि छोओस्)।

१०५ ततः श्राद्धकर्ता प्राचीनावीती भूत्वा दक्षिणाभिमुखः पातितवामजानुः पवित्र-पाणिरासीन एव पितृब्राह्मणभोजनपात्रे हुतशेषं किञ्चिदन्नमुद्धृत्य पितृब्राह्मणाय दत्त्वा (मधुनाऽभिघार्य) तदग्रे भूमौ उपनिहितं तत् पितृब्राह्मणभोजनपात्रम् (अधोमुखाभ्यां व्यस्ताभ्यां पाणिभ्याम्) आलभ्योत्सृज्य "ओ३म् पृथिवी ते पात्रन् द्यौरपिधानम् ब्राह्मणस्य मुखेऽ अमृतेऽ अमृतञ् जुहोमि स्वाहा" इति जपेत्। ततः पितृब्राह्मणस्य दक्षिणहस्तस्याऽङ्गुष्ठमादाय "ओ३म् इदवं विष्णुर् विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पाँसुरे" इति मन्त्रेण न्युब्जं तं तस्मिन्नन्ने अवगाहयेत्।

---

१०५. अनि श्राद्ध गर्नेले प्राचीनावीति (अपसव्य) भएर दक्षिणतिर फर्केर देउरे घुँडो भूमिसंलग्न गराएर कुशयुक्त हातवाला भएर बसेरै पितृब्राह्मणका भोजनपात्रमा अलिकति हुतशेष (हवन गरेर बाँकि रएको) अन्न राखेर त्यो भोजनपात्र पितृब्राह्मणलाइ टक्र्याएर *(तेस अन्नलाइ महले भिजाएर)* पितृब्राह्मणका अगाडि भैंमा टक्र्याइएको त्यो पितृब्राह्मणभोजनपात्रलाइ *(दाइने हातका मणिबन्धमाथि [नारिमाथि] देउरे हातको मणिबन्ध [नारि] राखिएका अधोमुख [घोउटा] हातहरुले)* छोएर छोडि "ओ३म् पृथिवी ते" इत्यादि मन्त्र जपोस्। अनि पितृब्राह्मणको दाइने हातको बुडिउम्लो समातेर "ओ३म् इदवं विष्णुर्" इत्यादि मन्त्रले घोउटो त्यो बुडिउम्लालाइ तेस अन्नमा गाडोस्।

[१०६]("ओ३म् इदमन्नम्" इत्यन्ने, "ओ३म् इमा आपः" इति जले, "ओ३म् इदमाज्यम्" इति घृते, "ओ३म् इदं हविः" इति पुनः अन्ने, "ओ३म् एतानि उपकरणानि" इति क्रमेण अन्न-जल-घृतादिषु पितृ-ब्राह्मणदक्षिणाङ्गुष्ठम् अवगाहयेत्।)

[१०७]**ततो मध्यमाप्रदेशिन्यङ्गुष्ठैस् तिलानादाय "ओ३म् अपहताऽ असुरा रक्षाᳪसि वेदिषदः" इति मन्त्रेण सान्नपात्रं पितृब्राह्मणं पितृब्राह्मणान्नपात्रमेव वा परितस् तान् तिलान् अप्रादक्षिण्येन पितृतीर्थानुगुण्येन च प्रकिरेत्। ततोऽप उपस्पृशेत्।**

[१०८]**ततस् तथैव मातामहब्राह्मणभोजनपात्रे हुतशेषं किञ्चिदन्नमुद्धृत्य**

---

१०६. *"ओ३म् इदमन्नम्" इत्यादि वाक्यहरु पढ्दै अन्न, जल, घिउ इत्यादिमा पितृब्राह्मणको दाइने हातको बुडि उम्लो गाडोस्।*

१०७. अनि माज्जि-चोरि-बुडिउम्लाहरुले तिल लिएर "ओ३म् अपहता" इत्यादि मन्त्रले अन्नपात्रसहित पितृब्राह्मणका वा पितृ-ब्राह्मणका अन्नपात्रका ओरिपोरि अप्रदक्षिण रूपमा पितृतीर्थानुगुण हुने गरि ति तिल छरोस्। अनि आचमन गरोस् (अथवा दाइने हातले पानि छोओस्)।

१०८. अनि तेसै गरि मातामहब्राह्मणका भोजनपात्रमा अलिकति हुतशेष अन्न राखेर अलिकति हुतशेष अन्न पिण्डका लागि पनि

हुतशेषमन्नं किञ्चित् पिण्डार्थमवशेष्य च मातामहब्राह्मणाय दत्त्वा (मधुनाऽभिघार्य) **तदग्रे भूमौ उपनिहितं तन् मातामहब्राह्मणभोजनपात्रम्** (अधोमुखाभ्यां व्यस्ताभ्यां पाणिभ्याम्) **आलभ्योत्सृज्य "ओ३म् पृथिवी ते पात्रन् द्यौरपिधानम् ब्राह्मणस्य मुखेऽ अमृतेऽ अमृतञ् जुहोमि स्वाहा" इति जपेत्। ततो मातामह-ब्राह्मणस्य दक्षिण-हस्तस्याऽङ्गुष्ठमादाय "ओ३म् इदंव् विष्णुर् विचक्रमे त्रेधा निदधे पदम्। समूढ-मस्य पाᳬसुरे" इति मन्त्रेण न्युब्जं तं तस्मिन्नन्ने अवगाहयेत्।**

[१०९]("ओ३म् इदमन्नम्" इत्यन्ने, "ओ३म् इमा आपः" इति जले, "ओ३म् इदमाज्यम्" इति घृते,

---

अवशिष्ट राखेर त्यो भोजनपात्र मातामहब्राह्मणलाइ टक्र्याएर *(तेस अन्नलाइ महले भिजाएर)* मातामहब्राह्मणका अगाडि भैंमा टक्र्याइएको त्यो मातामहब्राह्मणभोजनपात्रलाइ *(दाइने हातका मणिबन्धमाथि देउरे हातको मणिबन्ध राखिएका अधोमुख [घोउटा] हातहरुले)* छोएर छोडि "ओ३म् पृथिवी ते" इत्यादि मन्त्र जपोस्। अनि मातामहब्राह्मणको दाइने हातको बुडि उम्लो समातेर "ओ३म् इदंव् विष्णुर्" इत्यादि मन्त्रले त्यो घोउटो बुडि उम्लालाइ तेस अन्नमा गाडोस्।

१०९. *"ओ३म् इदमन्नम्" इत्यादि वाक्यहरु पढ्दै अन्न, जल, घिउ इत्यादिमा ब्राह्मणको दाइने हातको बुडि उम्लो गाडोस्।*

"ओ३म् इदं हविः" इति पुनः अन्ने, "ओ३म् एतानि उपकरणानि" इति क्रमेण अन्न-जल-घृतादिषु ब्राह्मण-दक्षिणाङ्गुष्ठम् अवगाहयेत्।)

[११०]ततो मध्यमाप्रादेशिन्यङ्गुष्ठैस् तिलानादाय "ओ३म् अपहताऽ असुरा रक्षाꣳसि वेदिषदः" इति मन्त्रेण सान्नपात्रं मातामहब्राह्मणं मातामहब्राह्मणान्नपात्रमेव वा परितस् तान् तिलान् अप्रादक्षिण्येन पितृतीर्थानुगुण्येन च प्रकिरेत्। ततोऽप उपस्पृशेत्।

(वैश्वदेविकब्राह्मणाय घृतौदनादीनां दानम्)

[१११]ततः उपवीती श्राद्धकर्ता पवित्रपाणिरासीन एव वैश्वदेविकब्राह्मणाय

---

११०. अनि माज्जि-चोरि-बुडिउम्लाहरुले तिल लिएर "ओ३म् अपहता" इत्यादि मन्त्रले अन्नपात्रसहित मातामहब्राह्मणका वा मातामहब्राह्मणका अन्नपात्रका ओरिपोरि अप्रदक्षिण रूपमा पितृतीर्थानुगत हुने गरि ति तिल छरोस्। अनि आचमन गरोस् (अथवा दाइने हातले पानि छोओस्)।

१११. अनि उपवीति (सव्य) भएको श्राद्ध गर्नेले कुशयुक्त हातवाला भएर बसेरै वैश्वदेविकब्राह्मणलाइ भुजा खिर इत्यादि अन्न यथाशक्ति देओस्।

घृतौदन–क्षीरौदन–कृशर–मोदकशष्कुल्यादिभक्ष्य–संयावाऽपूपादिभोज्यरूपं नाना-प्रकारसंस्कृतनानाविधहृद्यमांसस्थानापन्नसुसंस्कृतस्फुरितमाषवटक-नानाविधशाक-व्यञ्जना-ऽषाडवराग-लेह्य-चूष्य-कन्द-मूल-फल-पानक-पयो-दधि-शर्करा-रसाला-मधु-घृत-जल-सूपयुतं सुखोष्णं यथेष्टं यथाशक्ति वा अन्नं दद्यात्।

(अन्नसङ्कल्पः)

[११२](तत **उपवीत्येव** भूमौ सजलं पत्रपुटकं निधाय दक्षिणहस्तेन कुशतिलजलमादाय वामहस्त-कनिष्ठाङ्गुल्या भूमिष्ठपत्रपुटकजलं वामहस्ताङ्गुष्ठेन ब्राह्मणभोज्यान्नं च स्पृष्ट्वा "ओ३म् अस्मत्पितृ-पितामह-प्रपितामहानाम् ....शर्म-..........शर्म-..........शर्मणाम् ....गोत्राणां वसु-रुद्रा-ऽऽदित्य-स्वरूपाणां तथा अस्मन्मातामह-प्रमातामह-वृद्धप्रमातामहानाम् ....शर्म-..........शर्म-..........शर्मणाम्

---

११२. *अनि जनै र उपर्ना देउरे काँदमा पारेरै (उपवीति [सव्य] नै रएर) भैंमा जलयुक्त दुनो राखेर दाइने हातले देवकर्मपात्रका कुश तिल र जल लिएर देउरे हातका कान्छिउम्लाले भैंमा राखेका दुनाको पानि र बुडिउम्लाले अन्न छोएर "ओ३म् अस्मत्पितृ" इत्यादि वाक्य उच्चारण गरेर कुश-तिल-जलहरु भैंमा नै छोडोस्। अनि अन्नसङ्कल्पसिद्ध होओस्, भोजन गर्नुहोस् भन्ने अर्थका वाक्य उच्चारण गरि वैश्वदेवब्राह्मणका हातमा जल देओस्।*

..........गोत्राणां वसु-रुद्रा-ऽऽदित्यस्वरूपाणां च श्राद्धाभ्यां सम्बद्धेभ्यो विश्वेभ्यो देवेभ्यः पुरूरवोमाद्रवो-नामभ्यः अद्य कर्तव्ये भाद्रपदापरपक्षरूपमहालयान्तर्गतपार्वणश्राद्धे इदमन्नं सजलं सोपस्करं परिविष्टं यथावश्यकं ब्राह्मणतृप्तिपर्यन्तं परिवेक्ष्यमाणं च अक्षय्यतृप्तिहेतोर् वः स्वाहा" इति भूमावेव कुशादिक-मुत्सृजेत्। ततः "ओ३म् अन्नसङ्कल्पसिद्धिरस्तु, भवन्तोऽश्नन्तु" इति ब्राह्मणहस्ते जलं दद्यात्।)

(पितृब्राह्मणाय घृतौदनादीनां दानम्)

[११३]**ततः प्राचीनावीती भूत्वा पवित्रपाणिरासीन एव श्राद्धकर्ता पितृब्राह्मणाय घृतौदन–क्षीरौदन–कृशर–मोदकशष्कुल्यादिभक्ष्य–संयावापूपादिभोज्यरूपं नाना-प्रकारसंस्कृतनानाविधहृद्यमांसस्थानापन्नसुसंस्कृतस्फुरितमाषवटक-नानाविधशाक-व्यञ्जना-ऽषाडवराग-लेह्य-चूष्य-कन्द-मूल-फल-पानक-पयो-दधि-शर्करा-रसाला-मधु-घृत-जल-सूपयुतं सुखोष्णं यथेष्टं यथाशक्ति वा अन्नं दद्यात्।**

---

११३. अनि प्राचीनावीति (अपसव्य) भएर श्राद्ध गर्नेले कुशयुक्त हातवाला भएर बसेरै पितृब्राह्मणलाइ भुजा खिर इत्यादि अन्न-व्यञ्जनादि यथाशक्ति देओस्।

(अन्नसङ्कल्पः)

[११४](ततः **प्राचीनावीती** एव भूमौ सजलं पत्रपुटकं निधाय दक्षिणहस्तेन द्विगुणदर्भ(मोटक)तिलजलमादाय वामहस्त-कनिष्ठाङ्गुल्या भूमिष्ठपत्रपुटकजलं वामहस्ताङ्गुष्ठेन ब्राह्मणभोज्यान्नं च स्पृष्ट्वा "ओ३म् अस्मत्पितृ-पितामह-प्रपितामहेभ्यः ....शर्म- ....शर्म- ....शर्मभ्यः ....गोत्रेभ्यो वसु-रुद्रा-ऽऽदित्य-स्वरूपेभ्यः अद्य कर्तव्ये भाद्रपदापरपक्षरूपमहालयान्तर्गतपार्वणश्राद्धे इदमन्नं सजलं सोपस्करं परिविष्टं यथावश्यकं ब्राह्मणतृप्तिपर्यन्तं परिवेक्ष्यमाणं च अक्षय्यतृप्तिहेतोर् वः स्वधा" इति भूमावेव द्विगुणदर्भा-(मोटका)दिकमुत्सृजेत्। ततः "ओ३म्, अन्नसङ्कल्पसिद्धिरस्तु, भवन्तोऽश्नन्तु" इति ब्राह्मणहस्ते जलं दद्यात्।)

(मातामहब्राह्मणाय घृतौदनादीनां दानम्)

[११५]**ततस् तथैव मातामहब्राह्मणाय च घृतौदन-क्षीरौदन-कृशर-मोदकशष्कुल्या-**

---

११४. *अनि जनै र उपर्ना दाइने काँदमा पारेर (प्राचीनावीति [अपसव्य] नै रएर) भुँमा जलयुक्त दुनो राखेर दाइने हातले पितृकर्मपात्रका मोटक तिल र जल लिएर देउरे हातका कान्छिउम्लाले भुँमा राखेका दुनाको पानि र बुडिउम्लाले अन्न छोएर "ओ३म् अस्मत्पितृ" इत्यादि वाक्य उच्चारणगरेर मोटक-तिल-जलहरु भुँमा नै छोडोस्। अनि अन्नसङ्कल्पसिद्ध होओस्, भोजन गर्नुहोस् भन्ने अर्थका वाक्य उच्चारण गरि पितृब्राह्मणका हातमा जल देओस्।*

११५. अनि तेसै गरि मातामहब्राह्मणलाइ पनि भुजा खिर इत्यादि अन्न यथाशक्ति देओस्।

दिभक्ष्य-संयावाऽपूपादिभोज्यरूपं नानाप्रकारसंस्कृतनानाविधहृद्यमांसस्थानापन्न-सुसंस्कृतस्फुरितमाषवटक-नानाविधशाक-व्यञ्जना-ऽषाडवराग-लेह्य-चूष्य-कन्द-मूल-फल-पानक-पयो-दधि-शर्करा-रसाला-मधु-घृत-जल-सूपयुतं सुखोष्णं यथेष्टं यथाशक्ति वा अन्नं दद्यात्।

(अन्नसङ्कल्पः)

[११६](ततः **प्राचीनावीती** एव भूमौ सजलं पत्रपुटकं निधाय दक्षिणहस्तेन द्विगुणदर्भ(मोटक)तिलजल-मादाय वामहस्त-कनिष्ठाङ्गुल्या भूमिष्ठपत्रपुटकजलं वामहस्ताङ्गुष्ठेन ब्राह्मणभोज्यान्नं च स्पृष्ट्वा "ओ३म् अस्मन्मातामह-प्रमातामह-वृद्धप्रमातामहेभ्यः ....शर्म-............शर्म-............शर्मभ्यः ....गोत्रेभ्यो वसु-रुद्रा-ऽऽदित्यस्वरूपेभ्यः अद्य कर्तव्ये भाद्रपदापरपक्षरूपमहालयान्तर्गतपार्वणश्राद्धे इदमन्नं सजलं

---

११६. *अनि जनै र उपर्ना दाइने काँदमा पारेरै (प्राचीनावीति [अपसव्य] नै रएर) भैंमा जलयुक्त दुनो राखेर दाइने हातले पितृकर्मपात्रका मोटक तिल र जल लिएर देउरे हातका कान्छिउम्लाले भैंमा राखेका दुनाको पानि र बुडिउम्लाले अन्न छोएर "ओ३म् अस्मन्मातामह" इत्यादि वाक्य उच्चारणगरेर मोटक-तिल-जलहरु भैंमा नै छोडोस्। अनि अन्नसङ्कल्पसिद्ध होओस्, भोजन गर्नुहोस भन्ने अर्थका वाक्य उच्चारणगरि ब्राह्मणका हातमा जल देओस्।*

सोपस्करं परिविष्टं यथावश्यकं ब्राह्मणतृप्तिपर्यन्तं परिवेक्ष्यमाणं च अक्षय्यतृप्तिहेतोर् वः स्वधा" इति भूमावेव द्विगुणदर्भा(मोटका)दिकमुत्सृजेत्। ततः "ओ३म् अन्नसङ्कल्पसिद्धिरस्तु, भवन्तोऽश्नन्तु" इति ब्राह्मणहस्ते जलं दद्यात्।)

(ब्राह्मणभोजनम्)

[११७]ब्राह्मणाश् च आचम्य भूमौ बलिहरणमकृत्वैव प्राणाहुतीर् हुत्वाऽहुत्वैव वा मौनिनो यथासुखमश्नीयुः।

[११८]तदा श्राद्धकर्तुः पत्नीजनः पुत्त्रोऽन्यो वा योग्यो जनो यथार्हमुपवीती

---

११७. ब्राह्मणहरुले आचमन गरेर भूमिमा बलिहरण नगरिकनै प्राणाहुति होमेर ("प्राणाय स्वाहा" इत्यादि वाक्य उच्चारणगरि पञ्चग्रास खाएर) वा नहोमिकनै मौनधारण गरेर सजिलो गरि भोजन गरुन्।

११८. तेस अवसरमा श्राद्ध गर्नेकि पत्नीले वा पुत्त्रले वा अरु योग्य जनले यथायोग्य उपवीति (सव्य) वा प्राचीनावीति (अपसव्य) भएर ब्राह्मणहरुका इच्छाअनुसार भुजा इत्यादि भोज्यपदार्थहरु थपिथपि भोज्य पदार्थादिका मधुरता अम्लता स्वादुता इत्यादि गुणको प्रशंसा गर्दै ब्राह्मणहरुलाइ खान प्रोत्साहित गर्दै भोजन गराउन्।

प्राचीनावीती वा ब्राह्मणेच्छानुसारं घृतौदनादिकं परिविष्यपरिविष्य पाकगुणादिकं प्रशंसन् ब्राह्मणान् भोजयेत्।

(ब्राह्मणेषु अश्नत्सु जपः)

[११९]ब्राह्मणेषु अश्नत्सु सत्सु श्राद्धकर्ता वैश्वदेविकब्राह्मणस्याऽग्रतः किञ्चिद्दूरे उत्तरभागे कुशेषु कुशोत्तरे आसने वा उपविश्य उपवीती प्राङ्मुख आचम्य दक्षिणाभिमुखः प्राचीनावीती "ओ३म्। भूरब् भुवः स्वः। ओ३म्। तत् त्संवितुरव् वरेण्ण्यम्

---

११९. ब्राह्मणहरुले भोजन गर्दै गर्दा श्राद्ध गर्नेले वैश्वदेविकब्राह्मणका अगाडि केइ पर उत्तर भागमा कुशहरुमा वा कुश राखिएका आसनमा बसेर उपवीति (सव्य) भएर पूर्व फर्केर आचमन गरि दक्षिणतिर फर्केर प्राचीनावीति (अपसव्य) भएर ब्राह्मणहरु तृप्त नभइञ्जेल प्रणव (ओङ्कार), महाव्याहृति, प्रणव र गायत्री तथा आँफ्ना सूत्रमा विहित राक्षोघ्नमन्त्र इत्यादि ब्राह्मणहरुलाइ सुनाउँदै उदात्त इत्यादि कण्ठस्वरले युक्त रूपमा जपोस्। आँफ्नो सूत्रमा विहित राक्षोघ्नमन्त्रादिको जप गर्न समर्थ नभए तिनका ठाममा सावित्र गायत्री वा "ओ३म् नमो वः पितरो रसाय" इत्यादि यजुहरु नै ब्राह्मणहरु तृप्त नभइञ्जेल वारंवार उदात्तादिकण्ठस्वरयुक्त रूपमा जपोस्। (शत्रुघ्न मिश्रको मन्त्रार्थदीपिकाका तर्पणमन्त्रव्याख्याको र श्राद्धमन्त्रव्याख्याको (पृ.२८,२९,३८) पनि विचार गरि याँहाँ एस मन्त्रको समावेश गरिएको छ।)

"भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।" इति उदात्तादिकण्ठस्वरसहितं जपेत्। ततः स्वसूत्रोक्तराक्षोघ्नमन्त्रादिकं ब्राह्मणतृप्तिपर्यन्तं ब्राह्मणान् संश्रावयञ् जपेत्। तत्राऽशक्तत्वे राक्षोघ्नमन्त्रादिस्थाने गायत्रीमेव जपेत्, अथवा राक्षोघ्न-मन्त्रादिस्थाने "ओ३म् नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान् नः पितरो दत्त सतो वः पितरो देष्म" इति मन्त्रं ब्राह्मणतृप्तिपर्यन्तं पुनःपुनः उदात्तादि-कण्ठस्वर-सहिततया जपेत्।

(विकरः)

[१२०] ततो ब्राह्मणाँस् तृप्तान् ज्ञात्वा श्राद्धकर्ता प्राचीनावीत्येव एकस्मिन् पत्रपुटके

---

१२०. अनि ब्राह्मण तृप्त भएको बुजेपछि श्राद्ध गर्नेले एउटा दुनामा श्राद्धका निम्ति बनेका भुजा, खिर इत्यादि सबै प्रकारका अन्न समेत सबै नै भक्ष्य-भोज्य, तर्कारि, अचार, चटनि, कन्द, मूल, फल इत्यादि वस्तु अलिअलि लिएर तेसमा जल पनि हालेर

स्वल्पंस्वल्पं घृतौदन-क्षीरौदन-कृशर-मोदकशष्कुल्यादिभक्ष्य-संयावापूपादिभोज्य-रूपं नानाप्रकारसंस्कृतनानाविधहृद्यमांसस्थानापन्नसुसंस्कृतस्फुरितमाषवटक-नाना-विधशाक-व्यञ्जनाऽषाडवराग-लेह्य-चूष्य-कन्द-मूल-फल-पानक-पयो-दधि-शर्करा-रसाला-मधु-घृत-जल-सूपयुतं यथोपपन्नं वा अन्नमुद्धृत्य जलेनाऽऽप्लाव्य दक्षिणा-भिमुखः पितृब्राह्मणस्याऽग्रे ब्राह्मणान्नपात्रसन्निधौ भूमौ (दक्षिणाग्रकुशत्रयं सतिलमास्तीर्य द्विगुणदर्भ(मोटक)तिलजलमादाय– "असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम्। उच्छिष्टभागधेयानां दर्भेषु विकरासनम्" इति मन्त्रेण द्विगुणदर्भ(मोटक)रूपमासनमास्तृतकुशोपरि उत्सृजेत्। ततो द्विगुणदर्भ-(मोटक)तिलजलमादाय– "अग्निदग्धाश् च ये जीवा येऽप्यदग्धाः कुले मम। भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम्" इति मन्त्रमुच्चार्य आस्तृतकुशोपरि) **तदन्नं प्रकिरेत्।** (अत्र मन्त्रौ ओङ्काररहितौ एव प्रयुञ्जीत। अन्नं प्रकीर्य कुशान् परित्यजेत्।) **कुशाङ्गुलीयकं त्यजेच् च।**

दक्षिणतिर फर्केर ब्राह्मणका अगाडि ब्राह्मणभोजनपात्रका समीपमा भैंमा *(मोटक-तिल-जल लिएर मन्त्रहरु पढेर)* त्यो अन्न छरोस् *(याँहाँ मन्त्र ओङ्काररहित नै प्रयुक्त गरोस्)* र लाएको कुशको मुन्द्रो त्यागोस्।

(ब्राह्मणेभ्यः अपां दानम्)

[१२१]ततः श्राद्धकर्ता हस्तौ प्रक्षाल्योपवीती भूत्वाऽप उपस्पृश्य अन्यत् कुशाङ्गुलीयकमनामिकामध्यपर्वणि धृत्वा पवित्रपाणिरासीन एव वैश्वदेविकब्राह्मणाय तस्य हस्ते उदपात्रेण सकृदपो दद्यात्। वैश्वदेविकब्राह्मणश् च यथाविधि आचामेत्।

[१२२]ततः पवित्रपाणिरासीन एव क्रमेण पितृब्राह्मणाय मातामहब्राह्मणाय च तयोर् हस्ते उदपात्रेण सकृत्सकृदपो दद्यात्। तौ ब्राह्मणौ च यथाविधि आचामेताम्।

---

१२१. अनि श्राद्ध गर्नेले हात धोएर जनै र उपर्ना देउरे काँदमा पारेर (उपवीति भएर [सव्य भएर]) आचमन गरोस्। अनि दाइने हातको साइँलि उम्लाको माजाको पर्वमा आर्को कुशको मुन्द्रो लाएर पवित्रयुक्तहस्त भएर वैश्वदेविकब्राह्मणलाइ एकपल्ट हातमा जल देओस्। वैश्वदेविकब्राह्मणले यथाविधि भोजनान्तको आचमन गरुन्।

१२२. अनि पवित्रयुक्तहस्त भएर बसेरै क्रमैले पितृब्राह्मणलाइ र मातामहब्राह्मणलाइ पनि तिनका हातमा जलपात्रले एकएक पटक जल देओस्। ति ब्राह्मणले आचमन गरुन्।

[१२३]अत्र वागृयमनियमत्यागः।

(महाव्याहृत्यादिजपः)

[१२४]ततः श्राद्धकर्ता प्राचीनावीती भूत्वा वैश्वदेविकब्राह्मणस्याऽग्रतः किञ्चिद्-दूरे उत्तरभागे कुशेषु कुशोत्तरे आसने वा दक्षिणाभिमुख उपविश्य उदात्तादिकण्ठ-स्वरसहितं जपेत्– "ओ३म्। भूर्ब् भुवः स्वः। ओ३म्। तत् त्सवितुर्व् वरेण्ण्यम् भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥ मधु वाताऽ ऋतायते मधु क्क्षरन्ति सिन्धवः। माद्ध्वीर्न्न् नः सन्त्वोषधीः॥ मधु नक्क्तमुतोषसो मधुमत्त्

---

१२३. याँहाँ वाग्यमनियमको (शास्त्रविहित वाणीबाएक अरु वाणी नबोल्ने नियमको) त्याग हुन्छ।

१२४. अनि श्राद्ध गर्नेले प्राचीनावीति (अपसव्य) भएर वैश्वदेविकब्राह्मणका अगाडि केइ पर उत्तरभागमा कुशमा वा कुश राखेका आसनमा दक्षिणपट्टि फर्केर बसेर उदात्तादि कण्ठस्वरले युक्त रूपमा प्रणव (ओङ्कार), महाव्याहृति, प्रणव, गायत्री, मधुमती ऋचाहरु र मधु मधु मधु भन्ने मन्त्र पनि जपोस्।

पार्त्थिव॒ᳫ्ं रजः। मधु॒द् द्यौरस्तु नः पि॒ता॥ मधुमान् नो॒ वन॒स्पति॒र्म् मधुमाँऽ अस्तु॒ सूर्य्यः। माद्ध्वी॒र्ग् गावो भवन्तु नः॥ ओ३म् मधु॒ मधु॒ मधुं ओ३म्" इति।

(तृप्तिप्रश्नः)

[125]ततः श्राद्धकर्ता प्राचीनावीत्येव वैश्वदेविकब्राह्मणस्याऽग्रे किञ्चिदुत्तरतो दक्षिणाऽभिमुख उपविश्य वैश्वदेविकब्राह्मण-पितृब्राह्मण-मातामहब्राह्मणान् "ओ३म् तृप्ता स्थ" इति पृच्छेत्।

[126]ते च ब्राह्मणाः "ओ३म् तृप्ताः स्मः" इत्यनुजानीयुः।

---

१२५. अनि श्राद्ध गर्नेले वैश्वदेविकब्राह्मणका अगाडिपट्टि केइ उत्तरतिर दक्षिणतिर फर्केर बसेर ब्राह्मणहरुलाइ तृप्त हुनुहुन्छ? भनेर सोदोस्।

१२६. ति ब्राह्मणले अँ तृप्त छम् भनुन्।

१२७ **ततः श्राद्धकर्ता** प्राचीनावीत्येव **सर्वान् ब्राह्मणान् "ओ३म् शेषमन्नं पिण्डदानादिषूपयोक्ष्ये" इत्यनुज्ञां प्रार्थयेत।**

१२८ **ब्राह्मणाश् च "ओ३म् उपयुङ्क्ष्व" इत्यनुजानीयुः।**

(वेदिकरणपिण्डदानादिकम्)

१२९ **ततः श्राद्धकर्ता** प्राचीनावीत्येव **दक्षिणाभिमुखः पातितवामजानुर् ब्राह्मणो-**

---

१२७. अनि श्राद्धकर्ताले प्राचीनावीति (अपसव्य) नै रएर अवशिष्ट (बाँकि रएको) अन्न पिण्डदानादिमा उपयोग गर्ने छु भनेर सबै ब्राह्मणहरुसित अनुमति मागोस्।

१२८. ब्राह्मणहरुले पनि उपयोग गर्नुहोस् भनेर अनुमति दिउन्।

१२९. अनि श्राद्ध गर्नेले प्राचीनावीति (अपसव्य) रएरै दक्षिणपट्टि फर्केर देउरे घुँडो भूमिसंलग्न गरेर ब्राह्मणका उच्छिष्टका (जुठा पात्रहरुका) समीपमा उच्छिष्टबाट एक मुडिहात जति ठाम छोडेर चोखो माटाले वा बालुआले दक्षिणतिर पानिढलो भएको वेदि बनाएर वेदिका माजादेखि केइ पश्चिमपट्टि दाइने हातले लिएका कुशमञ्जरीका शलाकाले (छेस्काले) वा पवित्रले "ओ३म् अपहताऽ असुराः" इत्यादि मन्त्रले दक्षिणाग्र रेखा बनाओस्। अनि वेदिका माजादेखि केइ पूर्वपट्टि पनि तेसै गरि "ओ३म् अपहताऽ असुराः" इत्यादि मन्त्रले दक्षिणाग्र रेखा बनाओस्। अनि त्यो शलाका वा पवित्र उत्तरतिर फालोस्। अनि

च्छिष्टसमीपे उच्छिष्टादरत्निमितं देशं परित्यज्य शुद्धया मृदा शुद्धाभिः सिकताभिर् वा दक्षिणाप्रवणां वेदिकां निर्माय वेदिकाया मध्यभागस्य पश्चिमतो वेदिकायां दक्षिणहस्तगृहीतया दर्भपिञ्जूलिकया "ओ३म् अपहताऽ असुरा रक्षाꣳसि वेदिषदः" इति मन्त्रेण दक्षिणाग्रां लेखामुल्लिखेत्। ततो वेदिकाया मध्यभागस्य पूर्वतोऽपि वेदिकायां दक्षिणहस्तगृहीतया तयैव दर्भपिञ्जूलिकया "ओ३म् अपहताऽ असुरा रक्षाꣳसि वेदिषदः" इति मन्त्रेण द्वितीयां दक्षिणाग्रां लेखामुल्लिखेत्। दर्भपिञ्जूलिकानुत्तरतः प्रास्येत्। ततः पिण्डोत्थापनकालपर्यन्तस्थाय्यग्निधारणक्षमं शोभनदारू-

---

पिण्ड उत्थापन गर्ने वेलासम्म आगो रअन सक्ने सिप्लिघान् इत्यादि चोखा सद्‌दे दाउराको अउल्टाको वा गुइँठाको आगो पाकस्थानबाट लिएर "ओ३म् ये रूपाणि" इत्यादि मन्त्रले त्यो आगो उक्त पश्चिमपट्टिका रेखाका फेददेखि रेखारेखै लगेर रेखाका टुप्पानेर वेदिका दक्षिणपट्टि राखोस्। अनि आर्को तेस्तै अउल्टो वा गुइँठाको आगो पाकस्थानबाट लिएर "ओ३म् ये रूपाणि" इत्यादि मन्त्रले पूर्वपट्टिका रेखाका फेददेखि रेखारेखै लगेर रेखाका टुप्पानेर वेदिका दक्षिणपट्टि राखोस्। अनि जनै र उपर्ना देउरे काँदमा पारेर (यज्ञोपवीति [सव्य]) भएर पानि छोओस्।

ल्मुकमादाय "ओ३म् ये रूपाणि प्रतिमुञ्चमानाऽ असुराः सन्तः स्वधया चरन्ति। परापुरो निपुरो ये भरन्त्यग्निष्टाल्ँ लोकात् प्रणुदात्यस्मात्" इति मन्त्रेण उल्मुकाग्निम् अनुप्रथमलेखं नीत्वा प्रथमलेखायाः परस्ताद् दक्षिणतो निदध्यात्। ततो द्वितीयं पूर्वोक्तप्रकारमुल्मुकमादाय "ओ३म् ये रूपाणि प्रतिमुञ्चमानाऽ असुराः सन्तः स्वधया चरन्ति। परापुरो निपुरो ये भरन्त्यग्निष्टाल्ँ लोकात् प्रणुदात्यस्मात्" इति मन्त्रेण उल्मुकाग्निम् अनुद्वितीयलेखं नीत्वा द्वितीयलेखायाः परस्ताद् दक्षिणतो निदध्यात्। ततो यज्ञोपवीति प्राङ्मुखोऽप उपस्पृशेत्।

[१३०](ततः **प्राचीनावीती** भूत्वा "ओ३म् शन् नो देवीरभिष्टयऽ आपो भवन्तु पीतये। शंय् योरभिस्रवन्तु नः" इति मन्त्रेण जलेन वेदिकां सिञ्चेत्। तत **उपवीती** भूत्वा प्राङ्मुखः "ओ३म् देवताभ्यः पितृभ्यश् च

---

१३०. *अनि जनै र उपर्ना दाइने काँदमा पारेर (प्राचीनावीति [अपसव्य] भएर) "ओ३म् शन् नो" इत्यादि मन्त्रले वेदिसेचन गरोस्। अनि जनै र उपर्ना देउरे काँदमा राखेर (यज्ञोपवीति [सव्य] भएर) पूर्वतिर फर्केर "ओ३म् देवताभ्यः" इत्यादि पौराणमन्त्र तिनपल्ट पडोस्।*

महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमोनमः" इति त्रिः पठेत्।)

(अवनेजनम्)

[१३१]**(१) ततः श्राद्धकर्ता** प्राचीनावीत्येव **दक्षिणाभिमुखः पातितवामजानुरेव** (पितृकर्मपात्रान् मोटकतिलजलानि आदाय) **पितृतीर्थानुगतमुखेन उदपात्रेण "ओ३म् अस्मत्पितः ....शर्मन् ....गोत्र वसुस्वरूप अवनेनिक्ष्व** (ते स्वधा)**" इत्युक्त्वा प्रथमलेखामूलसमीपे लेखायामेव उदकं दत्त्वा पितरमवनेजयेत्।**

[१३२]**(२) ततस् तथैव** (पितृकर्मपात्रान् मोटकतिलजलानि आदाय) **"ओ३म् अस्मत्-**

---

१३१. अनि श्राद्ध गर्नेले प्राचीनावीति (अपसव्य) नै रएर दक्षिणतिर फर्केर देउरे घुँडो भूमिसंलग्न गरेरै *(पितृकर्मपात्रबाट मोटकतिलजलहरु लिएर)* पितृतीर्थसित मुख मिलेका जलपात्रले "ओ३म् अस्मत्पितः" इत्यादि वाक्य भनेर पैलो लेखाका (रेखाका) फेदका समीपमा लेखामै पानि दिएर पितालाइ हातमुख धुन लगाओस्।

१३२. अनि तेसै गरेर *(पितृकर्मपात्रबाट मोटकतिलजलहरु लिएर)* "ओ३म् अस्मत्पितामह" इत्यादि वाक्य भनेर पैलो लेखाका (रेखाका) मध्यभागमा पानि दिएर पितामहलाइ हातमुख धुन लगाओस्।

पितामह ....शर्मन् ....गोत्र रुद्रस्वरूप अवनेनिक्ष्व (ते स्वधा)" **इत्युक्त्वा प्रथमलेखामध्यभागे उदकं दत्त्वा पितामहमवनेजयेत्।**

[१३३] **(३) ततस् तथैव** (पितृकर्मपात्रान् मोटकतिलजलानि आदाय) **"ओ३म् अस्मत्-प्रपितामह ....शर्मन् ....गोत्र आदित्यस्वरूप अवनेनिक्ष्व** (ते स्वधा)" **इत्युक्त्वा प्रथमलेखाग्रसमीपे लेखायामेव उदकं दत्त्वा प्रपितामहमवनेजयेत्।**

[१३४] **(४) ततस् तथैव** (पितृकर्मपात्रान् मोटकतिलजलानि आदाय) **"ओ३म् अस्मन्-मातामह ....शर्मन् ....गोत्र वसुस्वरूप अवनेनिक्ष्व** (ते स्वधा)" **इत्युक्त्वा**

---

१३३. अनि फेरि तेसै गरेर *(पितृकर्मपात्रबाट मोटकतिलजलहरु लिएर)* "ओ३म् अस्मत्प्रपितामह" इत्यादि वाक्य भनेर पैलो लेखाका (रेखाका) टुप्पाका समीपमा लेखामै पानि दिएर प्रपितामहलाइ हातमुख धुन लगाओस्।

१३४. अनि फेरि तेसै गरेर *(पितृकर्मपात्रबाट मोटकतिलजलहरु लिएर)* "ओ३म् अस्मन्मातामह" इत्यादि वाक्य भनेर दोस्रा लेखाका (रेखाका) फेदका समीपमा लेखामै पानि दिएर मातामहलाइ हातमुख धुन लगाओस्।

द्वितीयलेखामूलसमीपे लेखायामेव उदकं दत्त्वा मातामहमवनेजयेत्।

[१३५](५) ततस् तथैव (पितृकर्मपात्रान् मोटकतिलजलानि आदाय) "ओ३म् अस्मत्-प्रमातामह ....शर्मन् ....गोत्र रुद्रस्वरूप अवनेनिक्ष्व (ते स्वधा)" इत्युक्त्वा द्वितीयलेखामध्यभागे उदकं दत्त्वा प्रमातामहमवनेजयेत्।

[१३६](६) ततस् तथैव (पितृकर्मपात्रान् मोटकतिलजलानि आदाय) "ओ३म् अस्मद्वृद्ध-प्रमातामह ....शर्मन् ....गोत्र आदित्यस्वरूप अवनेनिक्ष्व (ते स्वधा)" इत्युक्त्वा द्वितीयलेखाग्रमीपे लेखायामेव उदकं दत्त्वा वृद्धप्रमातामहमवनेजयेत्।

---

१३५. अनि फेरि तेसै गरेर *(पितृकर्मपात्रबाट मोटकतिलजलहरु लिएर)* "ओ३म् अस्मत्प्रमातामह" इत्यादि वाक्य भनेर दोस्रा लेखाका (रेखाका) मध्यभागमा पानि दिएर प्रमातामहलाइ हातमुख धुन लगाओस्।

१३६. अनि फेरि तेसै गरेर *(पितृकर्मपात्रबाट मोटकतिलजलहरु लिएर)* "ओ३म् अस्मद्वृद्धप्रमातामह" इत्यादि वाक्य भनेर दोस्रा लेखाका (रेखाका) टुप्पाका समीपमा लेखामै पानि दिएर वृद्धप्रमातामहलाइ हातमुख धुन लगाओस्।

(लेखयोर् द्विगुणदर्भास्तरणम्)

[१३७]तत उपमूलं सकृदाच्छिन्नान् द्विगुणदर्भान् उदङ्मूलतया प्रथमलेखायामुपस्तृणीयात्।

[१३८]ततस् तादृशानेव दर्भान् तथैव द्वितीयलेखायामुपस्तृणीयात्।

(पिण्डकरणम्)

[१३९]ततोऽग्नौकरणायोद्धृतेन हुतशेषेण ब्राह्मणेभ्यो दत्त्वाऽवशिष्टेनाऽन्नेन युक्ते

---

१३७. तेसपछि जरानेरै एकैपल्ट स्वाट्ट काटेका कुशबाट बनेका द्विगुणदर्भहरुलाइ फेद उत्तरतिर पर्ने गरेर पैलो (पश्चिमपट्टिको) रेखामा ओच्छ्याओस्।

१३८. अनि तेस्तै दर्भहरुलाइ तेसै गरि दोस्रो (पूर्वपट्टिको) रेखामा ओच्छ्याओस्।

१३९. अनि गर्दिदै गरेका श्राद्धका लागि निष्पन्न गरिएका ब्राह्मणले खाएर पाकभाण्डादिमा रएका भुजा, खिर इत्यादि सबै नै प्रकारका खाद्यपेय वस्तु पिण्ड मुछ्ने हुतशेषयुक्त टपरिमा अलिअलि झिकेर ठुला मदेसे अमलाजत्रा छ पिण्ड बनाउन पुग्ने गरेर झिकि एकत्र गरेर राम्ररि मुछेर ठुला मदेसे अमलाजत्रा छओटा पिण्ड बनाएर बनाएका क्रमले मिलाएर तेसै टपरिमा राखोस्।

पात्रे प्रकृतश्राद्धार्थं साधितं ब्राह्मणभुक्तावशिष्टं ततत्पाकादिभाण्डस्थं घृतौदन-क्षीरौदन–कृशर–मोदकशष्कुल्यादिभक्ष्य–संयावाऽपूपादिभोज्य–नानाप्रकारसंस्कृत-नानाविधहृद्यमांसस्थानापन्नसुसंस्कृतस्फुरितमाषवटक–नानाविधशाक–व्यञ्जना-ऽषाडवराग–लेह्य-चूष्य-कन्द-मूल-फल-पानक-पयो-दधि-शर्करा-रसाला-मधु-घृत-जल-सूप-रूपं सर्वविधमन्नं च स्थूलाऽऽमलकप्रमाणकपिण्डषट्कपर्याप्तम् उद्धृत्य हुतशेषसहितं सर्वमन्नं सम्यङ् मुञ्चित्वा तदन्नमयान् स्थूलामलकप्रमाणान् षट् पिण्डान् निर्माय निर्माणक्रमेण व्यवस्थितान् कृत्वा तस्मिन्नेव पात्रे स्थापयेत्।

(पिण्डदानम्)

[१४०] (१) ततः श्राद्धकर्ता प्राचीनावीत्येव दक्षिणाभिमुखः पातितवामजानुरासीन

---

१४०. अनि श्राद्ध गर्नेले प्राचीनावीति (अपसव्य) नै रएर दक्षिणतिर फर्केर देब्रे घुँडो भूमिसंलग्न गराएर बसेरै पवित्रयुक्त हातवाला भएर दाइने हातले *(पितृकर्मपात्रबाट मोटकतिलजलहरु लिएर)* पैलो पिण्ड लिएर "ओ३म् अस्मत्पितः" इत्यादि भनेर पैलो

एव च पवित्रपाणिर् दक्षिणहस्तेन (पितृकर्मपात्रान् मोटकतिलजलानि आदाय) **प्रथमं पिण्डमादाय "ओ३म् अस्मत्पितः ....शर्मन् ....गोत्र वसुस्वरूप एतत् ते अन्नम्** (अमृतस्वरूपमक्षय्यतृप्तिकरं) **स्वधा नमः" इत्युक्त्वा प्रथमलेखामूलसमीपे पित्रवनेजनस्थानसमीपे सकृदाच्छिन्नद्विगुणदर्भोपरि पितृतीर्थेन पित्रे पिण्डं दद्यात्।**

[१४१]**(२) ततस् तथैव** (पितृकर्मपात्रान् मोटकतिलजलानि आदाय) **द्वितीयपिण्डमादाय "ओ३म् अस्मत्पितामह ....शर्मन् ....गोत्र रुद्रस्वरूप एतत् ते अन्नम्** (अमृतस्वरूपमक्षय्यतृप्तिकरं) **स्वधा नमः" इत्युक्त्वा प्रथमलेखामध्यभागे पितामहावने-जनस्थानसमीपे सकृदाच्छिन्नद्विगुणदर्भोपरि पितृतीर्थेन पितामहाय पिण्डं दद्यात्।**

रेखाका फेदका समीपमा पिताका अवनेजन दिएका ठामका समीपमा द्विगुणदर्भमाथि पितृतीर्थले पितालाइ पिण्ड देओस्।

१४१. अनि तेसै गरेर *(पितृकर्मपात्रबाट मोटकतिलजलहरु लिएर)* दोस्रो पिण्ड लिएर "ओ३म् अस्मत्पितामह" इत्यादि वाक्य भनेर पैलो रेखाका माजाका समीपमा पितामहका अवनेजनस्थानका नजिकमा द्विगुणदर्भमाथि पितामहलाइ पिण्ड देओस्।

[१४२] **(३) ततस् तथैव** (पितृकर्मपात्रान् मोटकतिलजलानि आदाय) **तृतीयपिण्डमादाय "ओ३म् अस्मत्प्रपितामह ....शर्मन् ....गोत्र आदित्यस्वरूप एतत् ते अन्नम्** (अमृतस्वरूपमक्षय्यतृप्तिकरं) **स्वधा नमः" इत्युक्त्वा प्रथमलेखाग्रसमीपे प्रपितामहावने-जनस्थानसमीपे सकृदाच्छिन्नद्विगुणदर्भोपरि पितृतीर्थेन प्रपितामहाय पिण्डं दद्यात्।**

[१४३] **(४) ततस् तथैव** (पितृकर्मपात्रान् मोटकतिलजलानि आदाय) **चतुर्थपिण्डमादाय "ओ३म् अस्मन्मातामह ....शर्मन् ....गोत्र वसुस्वरूप एतत् ते अन्नम्** (अमृत-स्वरूपमक्षय्यतृप्तिकरं) **स्वधा नमः" इत्युक्त्वा द्वितीयलेखामूलसमीपे मातामहावनेजन-**

---

१४२. अनि तेसै गरेर *(पितृकर्मपात्रबाट मोटकतिलजलहरु लिएर)* तेस्रो पिण्ड लिएर "ओ३म् अस्मत्प्रपितामह" इत्यादि वाक्य भनेर पैलो रेखाका टुप्पाका समीपमा प्रपितामहका अनवनेजनका स्थानका समीपमा द्विगुणदर्भमाथि प्रपितामहलाइ पिण्ड देओस्।

१४३. अनि तेसै गरेर *(पितृकर्मपात्रबाट मोटकतिलजलहरु लिएर)* चौथो पिण्ड लिएर "ओ३म् अस्मन्मातामह" इत्यादि वाक्य भनेर दोस्रो रेखाका फेदका समीपमा मातामहका अवनेजनस्थानका समीपमा द्विगुणदर्भमाथि मातामहलाइ पिण्ड देओस्।

स्थानसमीपे सकृदाच्छिन्नद्विगुणदर्भोपरि पितृतीर्थेन मातामहाय पिण्डं दद्यात्।

[144]**(५) ततस् तथैव** (पितृकर्मपात्रान् मोटकतिलजलानि आदाय) **पञ्चमपिण्डमादाय "ओ३म् अस्मत्प्रमातामह .... शर्मन् .... गोत्र रुद्रस्वरूप एतत् ते अन्नम्** (अमृतस्वरूपमक्षय्यतृप्तिकरं) **स्वधा नमः" इत्युक्त्वा द्वितीयलेखामध्यभागे प्रमातामहावनेजनस्थानसमीपे सकृदाच्छिन्नद्विगुणदर्भोपरि पितृतीर्थेन प्रमातामहाय पिण्डं दद्यात्।**

[145]**(६) ततस् तथैव** (पितृकर्मपात्रान् मोटकतिलजलानि आदाय) **षष्ठपिण्डमादाय "ओ३म् अस्मद्वृद्धप्रमातामह .... शर्मन् .... गोत्र आदित्यस्वरूप एतत् ते**

---

१४४. अनि तेसै गरेर *(पितृकर्मपात्रबाट मोटकतिलजलहरु लिएर)* पाँचौं पिण्ड लिएर "ओ३म् अस्मत्प्रमातामह" इत्यादि वाक्य भनेर दोस्रो रेखाका माजाका समीपमा प्रमातामहका अवनेजनस्थानका समीपमा द्विगुणदर्भमाथि प्रमातामहलाइ पिण्ड देओस्।

१४५. अनि तेसै गरेर *(पितृकर्मपात्रबाट मोटकतिलजलहरु लिएर)* छैटो पिण्ड लिएर "ओ३म् अस्मद्वृद्धप्रमातामह" इत्यादि वाक्य भनेर दोस्रो रेखाका टुप्पाका समीपमा वृद्धप्रमातामहका अवनेजनस्थानका समीपमा द्विगुणदर्भमाथि वृद्धप्रमातामहलाइ पिण्ड देओस्।

अन्नम् (अमृतस्वरूपमक्षय्यतृप्तिकरं) **स्वधा नमः" इत्युक्त्वा द्वितीयलेखाग्रसमीपे वृद्धप्रमातामहावनेजनस्थानसमीपे सकृदाच्छिन्नद्विगुणदर्भोपरि पितृतीर्थेन वृद्धप्रमातामहाय पिण्डं दद्यात्।**

[१४६]**ततः** प्राचीनावीत्येव **श्राद्धकर्ता** (पुष्पादीन्यादाय पित्रादीनुद्दिश्य) **"ओ३म् अत्र पितरो मादयद्ध्वंय् यथाभागमावृषायद्ध्वम्" इत्युक्त्वा कुशाङ्गुलीयकं त्यक्त्वा हस्तं प्रक्षाल्य अप्रदक्षिणं पर्यावृत्य उदङ्मुखो भूत्वा श्वासगतिं रुद्ध्वा** (भास्करमूर्तीन् पितॄन् ध्यायन्) **आतमनादासीत। ततः प्रदक्षिणं प्रत्यावृत्य पिण्डाभिमुखो भूत्वा**

---

१४६. अनि जनै र उपर्ना दाइने काँदमा पारेरै [अपसव्य नै रएर] *(पुष्पादि लिएर पित्रादिको उद्देश्य गरेर)* "ओ३म् अत्र पितरः" इत्यादि मन्त्र पडेर तेसपछि कुशको गुन्द्रो फुकालि हटाएर हात धोएर वामावर्त गरि घुमेर (देउरे हातपट्टि घुमेर) उत्तरतिर फर्केर ननिसास्सिएसम्म सास रोकेर *(भास्करमूर्ति पितृको ध्यान गर्दै)* बसोस्। अनि दक्षिणावर्त गरि घुमेर (दाइने हातपट्टि घुमेर) पिण्डतिर फर्केर *(पुष्पादि पिण्डमा राखेर)* "ओ३म् अमीमदन्त" इत्यादि मन्त्र सस्वर (उदात्तादिकण्ठस्वरसहित गरेर) जपोस्।

(पुष्पादिकं पिण्डेषु क्षिप्त्वा) **"ओ३म् अमीमदन्त पितरो यथाभागमावृंषायिषत" इति सोदात्तादिकण्ठस्वरं जपेत्।**

(प्रत्यवनेजनम्)

[१४७]**(१) ततः** प्राचीनावीत्येव **श्राद्धकर्ता** (पितृकर्मपात्रान् मोटकतिलजलानि आदाय) **पितृतीर्थानुगतमुखेन उदपात्रेण "ओ३म् अस्मत्पितः ....शर्मन् ....गोत्र वसु-स्वरूप अवनेनिक्ष्व** (ते स्वधा)**" इत्युक्त्वा पितृपिण्डमूले उदकं दत्त्वा पितरमवनेजयेत्।**

[१४८]**(२) ततस् तथैव** (पितृकर्मपात्रान् मोटकतिलजलानि आदाय) **"ओ३म् अस्मत्-**

---

१४७. अनि प्राचीनावीति (अपसव्य) नै रएर श्राद्ध गर्नेले *(पितृकर्मपात्रबाट मोटकतिलजलहरु लिएर)* पितृतीर्थसित मुख मिलेका जल-पात्रले "ओ३म् अस्मत्पितः" इत्यादि वाक्य भनेर पिताका पिण्डका फेदमा जल दिएर पितालाइ हातमुख धुन लगाओस्।

१४८. अनि तेसै गरि *(पितृकर्मपात्रबाट मोटकतिलजलहरु लिएर)* "ओ३म् अस्मत्पितामह" इत्यादि वाक्य भनेर पितामहका पिण्डका फेदमा जल दिएर पितामहलाइ हातमुख धुन लगाओस्।

पितामह ....शर्मन् ....गोत्र रुद्रस्वरूप अवनेनिक्ष्व (ते स्वधा)**" इत्युक्त्वा पितामहपिण्डमूले उदकं दत्त्वा पितामहमवनेजयेत्।**

[१४९]**(३) ततस् तथैव** (पितृकर्मपात्रान् मोटकतिलजलानि आदाय) **"ओ३म् अस्मत्-प्रपितामह ....शर्मन् ....गोत्र आदित्यस्वरूप अवनेनिक्ष्व** (ते स्वधा)**" इत्युक्त्वा प्रपितामहपिण्डमूले उदकं दत्त्वा प्रपितामहमवनेजयेत्।**

[१५०]**(४) ततस् तथैव** (पितृकर्मपात्रान् मोटकतिलजलानि आदाय) **"ओ३म् अस्मन्-मातामह ....शर्मन् ....गोत्र वसुस्वरूप अवनेनिक्ष्व** (ते स्वधा)**" इत्युक्त्वा**

---

१४९. अनि तेसै गरि *(पितृकर्मपात्रबाट मोटकतिलजलहरु लिएर)* "ओ३म् अस्मत्प्रपितामह" इत्यादि वाक्य भनेर प्रपितामहका पिण्डका फेदमा जल दिएर प्रपितामहलाइ हातमुख धुन लगाओस्।

१५०. अनि तेसै गरि *(पितृकर्मपात्रबाट मोटकतिलजलहरु लिएर)* "ओ३म् अस्मन्मातामह" इत्यादि वाक्य भनेर मातामहका पिण्डका फेदमा जल दिएर मातामहलाइ हातमुख धुन लगाओस्।

मातामहपिण्डमूले उदकं दत्त्वा मातामहमवनेजयेत्।

[१५१]**(५) ततस् तथैव** (पितृकर्मपात्रान् मोटकतिलजलानि आदाय) **"ओ३म् अस्मत्-प्रमातामह ....शर्मन् ....गोत्र रुद्रस्वरूप अवनेनिक्ष्व** (ते स्वधा)**" इत्युक्त्वा प्रमातामहपिण्डमूले उदकं दत्त्वा प्रमातामहमवनेजयेत्।**

[१५२]**(६) ततस् तथैव** (पितृकर्मपात्रान् मोटकतिलजलानि आदाय) **"ओ३म् अस्मद्-वृद्धप्रमातामह ....शर्मन् ....गोत्र आदित्यस्वरूप अवनेनिक्ष्व** (ते स्वधा)**" इत्युक्त्वा वृद्धप्रमातामहपिण्डमूले उदकं दत्त्वा वृद्धप्रमातामहमवनेजयेत्।**

---

१५१. अनि तेसै गरि *(पितृकर्मपात्रबाट मोटकतिलजलहरु लिएर)* "ओ३म् अस्मत्प्रमातामह" इत्यादि वाक्य भनेर प्रमातामहका पिण्डका फेदमा जल दिएर प्रमातामहलाइ हातमुख धुन लगाओस्।

१५२. अनि तेसै गरि *(पितृकर्मपात्रबाट मोटकतिलजलहरु लिएर)* "ओ३म् अस्मद्वृद्धप्रमातामह" इत्यादि वाक्य भनेर वृद्धप्रमाता-महका पिण्डका फेदमा जल दिएर वृद्धप्रमातामहलाइ हातमुख धुन लगाओस्।

(पुटाञ्जलिकरणम्)

[१५३]ततः श्राद्धकर्ता प्राचीनावीती दक्षिणाभिमुख एव च नीविं विस्रंस्य नमो व इत्यादिभिः षड्भिर् यजुर्भिर् भूमौ षट् पुटाञ्जलीन् कुर्यात्– "(१) ओ३म् नमो वः पितरो रसाय, (२) ओ३म् नमो वः पितरः शोषाय, (३) ओ३म् नमो वः पितरो जीवाय, (४) ओ३म् नमो वः पितरः स्वधायै, (५) ओ३म् नमो वः पितरो घोराय, (६) ओ३म् नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वः।" इति

---

१५३. अनि श्राद्ध गर्नेले जनै र उपर्ना दाइने काँदमा पारेरै (प्राचीनावीति [अपसव्य] नै रएर) दक्षिणतिरै फर्केर नीवि (धोतिको अपवर्तिका [एकभाग घुसारेर बटारेर फर्काइएको भाग]) फुस्काएर "ओ३म् नमो वः पितरो रसाय" इत्यादि छ ओडा यजुहरुले भैंमा छपल्ट सम्पुटाकार अञ्जलि गरोस्। (धोति लाउँदा नीवि बनेकै हुञ्छ, मूल वैदिक मार्गमा तिलकुश वा मोटक-फुल घुसारेर छुट्टै नीविकरण गरिरन आवश्यक पर्दैन, तसर्थ धोति लाउँदा बनेको नीवि (धोति कम्मरमा अड्याउन धोतिको किनारा दोब्ऱ्याएर बनाइएको गाँठोजस्तो भाग) नै पितृलाई प्रसन्न पार्न खोलेर सम्पुटाकार अञ्जलि गर्ने हो (तिलकुश वा मोटकफुल घुसारेर नीवि बनाएको भए त्यो हटाएर सम्पुटाकार अञ्जलि गर्ने हो।)

[१५४]ततो नीविं कृत्वा प्राङ्मुख उपवीत्यप उपस्पृश्य [आचम्य] श्राद्धकर्ता प्राचीनावीती भूत्वा पिण्डानामवेक्षणं कुर्वाणः "ओ३म् गृहान् नं÷ पितरो दत्त स॒तो वं÷ पितरो देष्म" इति उदात्तादिकण्ठस्वरसहितं जपेत्।

(सूत्रदानम्)

[१५५]ततः "ओ३म् एतद् वः पितरो वासः" इति मन्त्रेण मन्त्रावृत्त्या प्रतिपिण्डं पिण्डोपरि त्रीणित्रीणि सूत्राणि दक्षिणाग्रतया क्रमेणोपास्येत्।

---

१५४. अनि नीवि पूर्ववत् बनाएर श्राद्ध गर्नेले जनै र उपर्ना देउरे काँदमा पारेर (यज्ञोपवीति [सव्य] भएर) पूर्व फर्केर आचमन गरेर जनै र उपर्ना दाइने काँदमा पारेर (प्राचीनावीति [अपसव्य] भएर) पिण्डहरुलाइ हेर्दै "ओ३म् गृहान् नः" इत्यादि सस्वर (उदात्तादिकण्ठस्वरले युक्त रूपमा) जपोस्।

१५५. अनि "ओ३म् एतद् वः" इत्यादि मन्त्र पिण्डपिच्छे दोहोऱ्याउँदै पडेर पिण्डमाथि तिनतिनोडा काँचा धागा दक्षिणाग्र (दक्षिणपट्टि टुप्पा) गरेर चड़ाओस्।

(पिण्डपूजनम्)

[१५६](ततः पिण्डान् जलगन्धपुष्पाऽक्षतादिभिः सम्पूज्य धूपदीपौ च दत्त्वा पित्र्यकर्मपात्राद् द्विगुणदर्भ-(मोटक)तिलजलमादाय— "ओ३म् अस्मत्पितृ-पितामह-प्रपितामहाः ....शर्म-............शर्म-............शर्माणः ....गोत्रा वसु-रुद्रा-ऽऽदित्यस्वरूपा अद्य कर्तव्ये भाद्रपदापरपक्षरूपमहालयान्तर्गतपार्वणश्राद्धे एतानि पिण्डार्चनानि जलगन्धपुष्पाऽक्षतधूपदीपैक्षवादिनैवेद्यताम्बूलवस्त्रयज्ञोपवीतद्रव्याणि वः स्वधा" इति जलादिकमुत्सृजेत्। पुनः पित्र्यकर्मपात्राद् द्विगुणदर्भ(मोटक)तिलजलमादाय— "ओ३म् अस्मन्-मातामह-प्रमातामह-वृद्धप्रमातामहाः ....शर्म-............शर्म-............शर्माणः ....गोत्रा वसु-रुद्रा-ऽऽदित्यस्वरूपा अद्य कर्तव्ये भाद्रपदापरपक्षरूपमहालयान्तर्गतपार्वणश्राद्धे एतानि पिण्डार्चनानि जल-गन्धपुष्पाक्षतधूपदीपैक्षवादिनैवेद्यताम्बूलवस्त्रयज्ञोपवीतद्रव्याणि वः स्वधा" इति जलादिकमुत्सृजेत्।)

---

१५६. *अनि पिण्डहरुलाइ जल चन्दन इत्यादिले पूजा गरेर धूप-दीप पनि दिएर पितृकर्मपात्रबाट मोटक-तिल-जल लिएर "ओ३म् अस्मत्पितृ" इत्यादि वाक्य उच्चारणगरि मोटकादि भैंमा छोडिदेओस्। अनि फेरि पितृकर्मपात्रबाट मोटकादि लिएर "ओ३म् अस्मन्मातामह" इत्यादि वाक्य उच्चारणगरेर मोटकादि भैंमा छोडिदेओस्।*

(ब्राह्मणेभ्य आचमनोदकस्य दानम्)

१५७ततः श्राद्धकर्ता उपवीती अन्यत् कुशाङ्गुलीयकमनामिकामध्यपर्वणि धृत्वा पवित्रपाणिरासीन एव तत्कालकृतहस्तमुखचुच्यनेभ्यो वैश्वदेविकब्राह्मणादिभ्यो ब्राह्मणेभ्यः क्रमेण उदपात्रेण उदकं दद्यात्। ब्राह्मणाश् च आचामेयुः।

(वैश्वदेविकब्राह्मणकरे उदकपुष्पाक्षतानां दानम्)

१५८तत उपवीत्येवोदङ्मुखः श्राद्धकर्ता पवित्रपाणिरासीन एव वैश्वदेविकब्राह्मणकरे देवतीर्थानुगतमुखेन उदपात्रेण उदकम्, दक्षिणहस्तेन पुष्पाणि, यव-

---

१५७. अनि श्राद्ध गर्नेले यज्ञोपवीति भएर (सव्य भएर) आर्को कुशको मुन्द्रो साइँलि उम्लाको माजाको पर्वमा लाएर पवित्रयुक्तहस्त भएर तत्काल चुठेका ब्राह्मणहरुलाइ जल देओस्। ब्राह्मणहरुले आचमन गरुन्।

१५८. अनि उपवीति (सव्य) नै रएर उत्तरफर्केर श्राद्ध गर्नेले पवित्रयुक्त हातवाला भएर बसेरै वैश्वदेविकब्राह्मणका हातमा देवतीर्थसित मुख मिलेका जलपात्रले जल, दाइने हातले पुष्प (फुल) अनि अक्षता (जौ) पनि सव्य रीतिले देओस्। वैश्वदेविकब्राह्मणले पनि ति जल-पुष्प-जौहरु तिहिँ शुद्ध देशमा छोडिदिउन्।

रूपानक्षतांश् च प्राऽसव्यं दद्यात्। वैश्वदेविकब्राह्मणश् च तानुदकपुष्पाक्षतांस् तत्रैव शुचौ देशे क्षिपेत्।

[१५९](ततः श्राद्धकर्ता **उपवीत्येव** प्राङ्मुखः अञ्जलिं कृत्वा प्रार्थनां कुर्यात्– "ओ३म् अपां मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितम्। ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवन्तु मे॥ लक्ष्मीर् वसति पुष्पेषु लक्ष्मीर् वसति पुष्करे। लक्ष्मीर् वसति गोष्ठेषु सौमनस्यं ददातु मे॥ अक्षतं चाऽस्तु मे पुण्यं शान्तिः पुष्टिर् धृतिस् तथा। यद्यच् छ्रेयस्करं लोके तत्तदस्तु सदा मम" इति। ततो देवकर्मपात्रोदकं कुशैर् गृहीत्वा-गृहीत्वा प्रतिमन्त्रमात्मानं शिरस्यभिषिञ्चेत्– "ओ३म् अस्मत्कुले दीर्घमायुरस्तु; ओ३म् शान्तिरस्तु; ओ३म् पुष्टिरस्तु; ओ३म् वृद्धिरस्तु; ओ३म् यच् छ्रेयंस् तदस्तु" इति। ततः "ओ३म् यत् पापं तत् प्रतिहतमस्तु" इति भूमौ उदकं सिञ्चेत्। ततः पुनः "ओ३म् द्विपदेभ्यश् चतुष्पदेभ्यः शान्तिर् भवतु" इति आत्मानं शिरसि अभिषिञ्चेत्।

---

१५९. *अनि श्राद्ध गर्नेले उपवीति (सव्य) नै रएर पूर्व फर्केर हात जोडेर "ओ३म् अपां मध्ये" इत्यादि पौराण मन्त्रले प्रार्थना गरोस्। अनि देवकर्मपात्रको जल कुशहरुले वारंवार लिँदै "ओ३म् अस्मत्कुले" इत्यादि मन्त्रहरुले मन्त्रैपिच्छे आँफ्ना शिरमा अभिषेक गरोस्। अनि "ओ३म् यत् पापम्" इत्यादि मन्त्रले भैँमा पानि छ्यापोस्। अनि फेरि "ओ३म् द्विपदेभ्यः" इत्यादि मन्त्रले आँफ्ना शिरमा अभिषेक गरोस्।*

(वैश्वदेविकब्राह्मणकरे अक्षय्योदकस्य दानम्)

[१६०]ततः श्राद्धकर्ता "ओ३म् अस्मत्-पितृ-पितामह-प्रपितामहानाम् अस्मन्-मातामह-प्रमातामह-वृद्धप्रमातामहानां च श्राद्धाभ्यां सम्बद्धानां विश्वेषां देवानां दत्तमेतदन्नपानादिकमक्षय्यमस्तु इति ब्रूत" इत्युक्त्वा देवतीर्थानुगतमुखेन उदपात्रेण वैश्वदेविकब्राह्मणकरे अक्षय्योदकं दद्यात्।

[१६१]वैश्वदेविकब्राह्मणश् च "ओ३म् अस्त्वक्षय्यम्" इति ब्रूयात्।

(पितृब्राह्मणकरे उदकपुष्पाक्षतानां दानम्)

[१६२]ततः प्राचीनावीती दक्षिणाभिमुखः पवित्रपाणिरासीन एव श्राद्धकर्ता पितृ-

---

१६०. अनि श्राद्ध गर्नेले "ओ३म् अस्मत्पितृ" इत्यादि वाक्य भनेर देवतीर्थसित मुख मिलेका जलपात्रले वैश्वदेविकब्राह्मणका हातमा अक्षय्योदक देओस्।

१६१. वैश्वदेविकब्राह्मणले पनि "ओ३म् अस्त्वक्षय्यम्" भनुन्।

१६२. अनि प्राचीनावीति (अपसव्य) भएर दक्षिणतिर फर्केका पवित्रयुक्त हातवाला बसेकै श्राद्धकर्ताले पितृब्राह्मणका हातमा पितृ-

ब्राह्मणकरे पितृतीर्थानुगतमुखेन उदपात्रेण उदकम्, दक्षिणहस्तेन पुष्पाणि, यवरूपानक्षताँश् चाऽपसव्यं दद्यात्। पितृब्राह्मणश् च तानुदकपुष्पाक्षतान् तत्रैव शुचौ देशे क्षिपेत्।

[१६३](ततः श्राद्धकर्ता **उपवीती** भूत्वा प्राङ्मुखः प्रार्थनां कुर्यात्– "ओ३म् अपां मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितम्। ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवन्तु मे॥ लक्ष्मीर् वसति पुष्पेषु लक्ष्मीर् वसति पुष्करे। लक्ष्मीर् वसति गोष्ठेषु सौमनस्यं ददातु मे॥ अक्षतं चाऽस्तु मे पुण्यं शान्तिः पुष्टिर् धृतिस् तथा। यद्यच् छ्रेयस्करं लोके तत्तदस्तु सदा मम" इति। ततः देवकर्मपात्रोदकं कुशैर् गृहीत्वा-गृहीत्वा प्रतिमन्त्रमात्मानं शिरस्यभिषिञ्चेत्– "ओ३म् अस्मत्कुले दीर्घमायुरस्तु; ओ३म् शान्तिरस्तु; ओ३म् पुष्टिरस्तु;

तीर्थसित मुख मिलेका जलपात्रले जल, दाइने हातले पुष्प (फुल) र यवरूप अक्षता (जौ) पनि अपसव्य रीतिले देओस्। पितृब्राह्मणले पनि ति जल-फुल-जौहरु तिहिँ शुद्ध भूमिमा छोडिदिउन्।

१६३. *अनि श्राद्ध गर्नेले उपवीति (सव्य) भएर पूर्व फर्केर हात जोडेर "ओ३म् अपां मध्ये" इत्यादि पौराण मन्त्रले प्रार्थना गरोस्। अनि देवकर्मपात्रको जल कुशहरुले वारंवार लिँदै "ओ३म् अस्मत्कुले" इत्यादि मन्त्रहरुले मन्त्रैपिच्छे आँफ्ना शिरमा अभिषेक गरोस्। अनि "ओ३म् यत् पापम्" इत्यादि मन्त्रले भैंमा पानि छ्यापोस्। अनि फेरि "ओ३म् द्विपदेभ्यः" इत्यादि मन्त्रले आँफ्ना शिरमा अभिषेक गरोस्।*

ओ३म् वृद्धिरस्तु; ओ३म् यच् छ्रेयस् तदस्तु" इति। ततः "ओ३म् यत् पापं तत् प्रतिहतमस्तु" इति भूमौ उदकं सिञ्चेत्। ततः पुनः "ओ३म् द्विपदेभ्यश् चतुष्पदेभ्यः शान्तिर् भवतु" इति आत्मानं शिरसि अभिषिञ्चेत्।

[१६४]ततः **प्राचीनावीती** भूत्वा श्राद्धकर्ता पिण्डशेषान्नं पिण्डसमीपे विकिरेत्।)

(पितृब्राह्मणकरे अक्षय्योदकस्य दानम्)

[१६५]**ततः श्राद्धकर्ता** प्राचीनावीत्येव **दक्षिणाभिमुखः "ओ३म् अस्मत्-पितृ-पितामह-प्रपितामहानाम् ....शर्म्म- ....शर्म्म- ....शर्म्मणाम् ....गोत्राणां वसुस्वरूप-रुद्रस्वरूपा-ऽऽदित्त्यस्वरूपाणां दत्तमेतदन्नपानादिकमक्षय्यमस्तु इति ब्रूत" इत्युक्त्वा पितृतीर्थानुगतमुखेन उदपात्रेण पितृब्राह्मणकरे अक्षय्योदकं दद्यात्।**

---

१६४. *अनि प्राचीनावीति (अपसव्य) भएर श्राद्ध गर्नेले पिण्डशेष (पिण्ड दिएर रएको) अन्न पिण्डका समीपमा छरोस्।*

१६५. अनि श्राद्ध गर्नेले प्राचीनावीति (अपसव्य) नै रएर दक्षिणतिर फर्केर "ओ३म् अस्मत्पितृ" इत्यादि वाक्य भनेर पितृतीर्थसित मुख मिलेका जलपात्रले पितृब्राह्मणका हातमा अक्षय्योदक देओस्।

[१६६]पितृब्राह्मणश् च "ओ३म् अस्त्वक्षय्यम्" इति ब्रूयात्।

(मातामहब्राह्मणकरे उदकपुष्पाक्षतानां दानम्)

[१६७]ततस् तथैव श्राद्धकर्ता मातामहब्राह्मणकरे उदपात्रेण उदकम्, दक्षिणहस्तेन पुष्पाणि यवरूपानक्षताँश्चाऽपसव्यमेव दद्यात्। मातामहब्राह्मणश् च तानुदकपुष्पाक्षतान् तत्रैव शुचौ देशे क्षिपेत्।

[१६८](ततः श्राद्धकर्ता **उपवीती** भूत्वा प्राङ्मुखः प्रार्थनां कुर्यात्– "ओ३म् अपां मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितम्। ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवन्तु मे॥ लक्ष्मीर् वसति पुष्पेषु लक्ष्मीर् वसति

---

१६६. पितृब्राह्मणले पनि "ओ३म् अस्त्वक्षय्यम्" भनुन्।

१६७. अनि तेसरि नै श्राद्ध गर्नेले मातामहब्राह्मणका हातमा जलपात्रले जल, दाइने हातले पुष्प (फुल) र अक्षता (जौ) पनि अपसव्य रीतिले नै देओस्। मातामहाब्राह्मणले पनि ति जल-पुष्प-जौहरु तिहिँ शुद्धभूमिमा छोडिदिउन्।

१६८. *अनि श्राद्ध गर्नेले उपवीति (सव्य) भएर पूर्व फर्केर हात जोडेर "ओ३म् अपां मध्ये" इत्यादि पौराण मन्त्रले प्रार्थना गरोस्। अनि देवकर्मपात्रको जल कुशहरुले वारंवार लिँदै "ओ३म् अस्मत्कुले" इत्यादि मन्त्रहरुले मन्त्रैपिच्छे आँफ्ना शिरमा अभिषेक गरोस्। अनि "ओ३म् यत् पापम्" इत्यादि मन्त्रले भैंमा पानि छ्यापोस्। अनि फेरि "ओ३म् द्विपदेभ्यः" इत्यादि मन्त्रले आँफ्ना शिरमा अभिषेक गरोस्।*

पुष्करे। लक्ष्मीर् वसति गोष्ठेषु सौमनस्यं ददातु मे॥ अक्षतं चाऽस्तु मे पुण्यं शान्तिः पुष्टिर् धृतिस् तथा। यद्यच् छ्रेयस्करं लोके तत्तदस्तु सदा मम" इति। ततः देवकर्मपात्रोदकं कुशैर् गृहीत्वा-गृहीत्वा प्रतिमन्त्रमात्मानं शिरस्यभिषिञ्चेत्— "ओ३म् अस्मत्कुले दीर्घमायुरस्तु; ओ३म् शान्तिरस्तु; ओ३म् पुष्टिरस्तु; ओ३म् वृद्धिरस्तु; ओ३म् यच् छ्रेयस् तदस्तु" इति। ततः "ओ३म् यत् पापं तत् प्रतिहतमस्तु" इति भूमौ उदकं सिञ्चेत्। ततः पुनः "ओ३म् द्विपदेभ्यश् चतुष्पदेभ्यः शान्तिर् भवतु" इति आत्मानं शिरसि अभिषिञ्चेत्।

१६९ ततः **प्राचीनावीती** भूत्वा श्राद्धकर्ता पिण्डशेषान्नं पिण्डसमीपे विकिरेत्।)

(मातामहब्राह्मणकरे अक्षय्योदकस्य दानम्)

१७० ततः श्राद्धकर्ता "ओ३म् अस्मन्-मातामह-प्रमातामह-वृद्धप्रमातामहानाम् ....शर्म्म-............शर्म्म-............शर्म्मणाम् ....गोत्राणां वसुस्वरूप-रुद्र-स्वरूपा-दित्त्यस्वरूपाणां दत्तमेतदन्नपानादिकमक्षय्यमस्तु इति ब्रूत" इत्युक्त्वा

---

१६९. अनि प्राचीनावीति (अपसव्य) भएर श्राद्ध गर्नेले पिण्डशेष (पिण्ड दिएर रएको) अन्न पिण्डका समीपमा छरोस्।

१७०. अनि श्राद्ध गर्नेले "ओ३म् अस्मन्मातामह" इत्यादि वाक्य भनेर पितृतीर्थसित मुख मिलेका जलपात्रले मातागहब्राह्मणका हातमा अक्षय्योदक देओस्।

उदपात्रेण मातामहब्राह्मणकरे अक्षय्योदकं दद्यात्।

[१७१]मातामहब्राह्मणश् च "ओ३म् अस्त्वक्षय्यम्" इति ब्रूयात्।

(आशीःप्रार्थनम्)

[१७२]तत उपवीती भूत्वा श्राद्धकर्ता वैश्वदेविकब्राह्मणोत्तरभागे प्राङ्मुखः कुशेषु (कुशोत्तरासने वा) आसीनोऽप उपस्पृश्य अञ्जलिं कृत्वा आशिषः प्रार्थयेत, ब्राह्मणाश्चाऽऽशिषो ब्रूयुः। कुशवटुपक्षे आशिषोऽपि स्वयमेव ब्रूयात्। तद् यथा— श्राद्धकर्ता— "ओ३म् अघोराः पितरः सन्तु; ब्राह्मणाः— ओ३म् सन्तु। श्राद्धकर्ता—

---

१७१. मातामहब्राह्मणले पनि "ओ३म् अस्त्वक्षय्यम्" भनुन्।

१७२. अनि उपवीति (सव्य) भएर श्राद्ध गर्नेले वैश्वदेविकब्राह्मणका उत्तर भागमा पूर्वतिर फर्केर कुशहरुमा (वा माथि कुश राखेको आसनमा) बसेर आचमन गरेर हात जोडेर आशीर्वाद मागोस्, ब्राह्मणहरुले आशीर्वाद दिउन्। कुशवटु राखेर श्राद्ध गर्दा आशीर्वाद पनि आँफै भनोस्। आशीर्वाद माग्दा श्राद्ध गर्नेले "ओ३म् अघोराः पितरः सन्तु" इत्यादि भनोस्। ब्राह्मणहरुले "ओ३म् सन्तु" इत्यादि भनुन्।

ओ३म् गोत्रन् नो वर्द्धताम्; ब्राह्मणाः— **ओ३म् वर्द्धताम्।** श्राद्धकर्ता— **ओ३म् दातारो नोऽभिवर्द्धन्ताम्;** ब्राह्मणाः— **ओ३म् अभिवर्द्धन्ताम्।** श्राद्धकर्ता— **ओ३म् वेदा नोऽभिवर्द्धन्ताम्;** ब्राह्मणाः— **ओ३म् अभिवर्द्धन्ताम्।** श्राद्धकर्ता— **ओ३म् सन्ततिर् नोऽभिवर्द्धताम्;** ब्राह्मणाः— **ओ३म् अभिवर्द्धताम्।** श्राद्धकर्ता— **ओ३म् श्रद्धा च नो मा व्यगमत्;** ब्राह्मणाः— **ओ३म् मा वि गमत्।** श्राद्धकर्ता— **ओ३म् बहुदेयञ्च नोऽस्तु;** ब्राह्मणाः— **ओ३म् अस्तु।** (श्राद्धकर्ता— ओ३म् अन्नञ् च नो बहु भवेत्। ब्राह्मणाः— ओ३म् भवेत्। श्राद्धकर्ता— ओ३म् अतिथींश् च लभेमहि। ब्राह्मणाः— ओ३म् लभध्वम्। श्राद्धकर्ता— ओ३म् याचितारश् च नः सन्तु। ब्राह्मणाः— ओ३म् सन्तु। श्राद्धकर्ता— ओ३म् मा याचिष्म कञ्चन। ब्राह्मणाः— ओ३म् मा याचिष्ट। श्राद्धकर्ता— ओ३म् एता आशिषः सत्याः सन्तु। ब्राह्मणाः— ओ३म् सन्तु) **इति।**

(तिलककरणम्)

[१७३](ततो ब्राह्मणहस्तेन तिलककरणम् "ओ३म् यं कामं कामयते सोऽस्मै कामः समृध्यताम्" इति।)

---

१७३. ञाने ब्राह्मणले "ओ३म् यं कामम्" इत्यादि मन्त्रले श्राद्ध गर्नेलाइ टिको लाइदिउन्।

(स्वधावाचनम्)

[१७४]ततः श्राद्धकर्ता प्राचीनावीती भूत्वा दक्षिणाभिमुखः स्वधावाचनीयान् कर्मान्तरे अप्रयुक्तान् कर्मान्तराऽप्रयुक्तपवित्रसहितान् ऋजून् कुशान् पिण्डानां पश्चिमत उत्तरतो वा पिण्डसमीपे भूमौ दक्षिणाग्रतया आस्तीर्य ब्राह्मणान् "ओ३म् स्वधां वाचयिष्ये" इति पृच्छेत्।

[१७५]ब्राह्मणाश् च "ओ३म् वाच्यताम्" इत्यनुजानीयुः।

[१७६]ततः श्राद्धकर्ताऽञ्जलिं कृत्वा "ओ३म् पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यो

---

१७४. अनि श्राद्ध गर्नेले प्राचीनावीति (अपसव्य) भएर दक्षिणतिर फर्केर अरु काममा प्रयुक्त नभएका पवित्रले युक्त अरु काममा नलगाइएका सोजा कुशहरु पिण्डहरुका पश्चिमपट्टि वा उत्तरपट्टि पिण्डका समीपमा भुँमा दक्षिणतिर टुप्पा पारेर ओच्छ्याएर ब्राह्मणहरुलाइ "ओ३म् स्वधां वाचयिष्ये" भनेर सोदोस्।

१७५. ब्राह्मणहरुले "ओ३म् वाच्यताम्" भनेर अनुमति दिउन्।

१७६. अनि श्राद्ध गर्नेले हात जोडेर "ओ३म् पितृभ्यः" इत्यादि वाक्यले ब्राह्मणहरुलाइ स्वधा भन्न प्रार्थना गरोस्।

मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यश् च स्वधोच्यताम्" इति प्रार्थयेत।

[१७७]ततो ब्राह्मणाश् च "ओ३म् अस्तु स्वधा पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यो मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यश् च" इति ब्रूयुः। कुशवटुपक्षे स्वयमेव तद् वाक्यं ब्रूयात्।

[१७८]ब्राह्मणैर् "ओ३म् अस्तु स्वधा" इत्यादिके वाक्ये उच्यमाने एव, कुशवटुपक्षे तु आत्मनैव तस्मिन् वाक्ये उक्ते, श्राद्धकर्ता "ओ३म् ऊर्जं वहन्तीरमृतङ् घृतम्

---

१७७. अनि ब्राह्मणहरूले "ओ३म् अस्तु स्वधा" इत्यादि वाक्य भनुन्। कुशवटु राखेर श्राद्ध गर्दा "ओ३म् पितृभ्यः" इत्यादि वाक्य पनि आँफै भनोस्।

१७८. ब्राह्मणहरूबाट "ओ३म् अस्तु स्वधा" इत्यादि वाक्य भनिँदै गर्दा नै, कुशवटु राखेर श्राद्ध गरेमा आँफैले त्यो वाक्य भनेपछि श्राद्ध गर्नेले "ओ३म् ऊर्ज्जं वहन्ती" इत्यादि मन्त्रले पवित्रसहित स्वधावाचनीय कुशमा पितृतीर्थसित मुख मिलेका जलपात्रले दक्षिणाग्र (उत्तरतिरबाट दक्षिणतिर अगि बढ्ने) जलधारा खसालोस्।

पयः कीलालम् परिस्रुतम्। स्वधा स्थ तर्पयत मे पितॄन्" इति मन्त्रेण स्वधावाचनीयेषु सपवित्रेषु कुशेषु पितृतीर्थानुगतमुखेनोदपात्रेण दक्षिणाग्रधारा अपो निषिञ्चेत्।

(पिण्डोत्थापनम्)

१७९(ततः "ओ३म् पिण्डाः सम्पन्नाः" इति ब्राह्मणान् पृच्छेत्, ब्राह्मणाश् च "ओ३म् सुसम्पनाः" इति ब्रूयुः, ततः श्राद्धकर्ता "पिण्डानुत्थापयामि" इति ब्राह्मणान् पृच्छेत्, ब्राह्मणाश् च "ओ३म् उत्थापयस्व" इति ब्रूयुः)।

१८०**ततः** प्राचीनावीत्येव **श्राद्धकर्ता पिण्डान् क्रमेणोत्थाप्य कृतपिण्डनिर्माणे पात्रेऽवदध्यात्।**

---

१७९. *अनि श्राद्ध गर्नेले पिण्ड सम्पन्न भए भनेर ब्राह्मणलाइ सोदोस्। ब्राह्मणले राम्रारि सम्पन्न भए भनुन्। अनि श्राद्ध गर्नेले पिण्ड उठाम् भनेर ब्राह्मणलाइ सोदोस्। ब्राह्मणले हुञ्च उठाउनुहोस् भनुन्।*

१८०. अनि प्राचीनावीति (अपसव्य) नै रहेका श्राद्धकर्ताले दिएकै क्रमले पिण्डहरु उठाएर अगि पिण्ड बनाएका पात्रमा (टपरिमा) राखोस्।

[१८१]ततः श्राद्धकर्ता उपवीती भूत्वा निह्वृत्य पिण्डानवजिघ्रेत्।

[१८२]ततः पिण्डाधारद्विगुणदर्भानग्नावभ्यादध्याद् उल्मुके च तन्मूलाग्नौ अपिसृजेत्।

[१८३](तत उपवीती एव श्राद्धकर्ता वेदिकायां शङ्खं चक्रं च लिखेत्, "ओ३म् शङ्खाय नमः", "ओ३म् चक्राय नमः" इति यवैः शङ्खचक्रपूजां कुर्यात्। ततः प्राचीनावीती "ओ३म् गयायां पितृरूपेण

---

१८१. अनि श्राद्ध गर्नेले उपवीति (सव्य) भएर निउरेर पिण्डहरु सुँगोस्।

१८२. अनि पिण्ड जेमाथि दिइएका थिए ति द्विगुणदर्भहरु आगामा हालोस्। अउल्टाहरु पनि अगि जुन अग्निबाट ल्याइएका थिए तेसै अग्निमा मिसाओस्।

१८३. *अनि श्राद्ध गर्नेले जनै र उपर्ना देउरे काँदमा पारेरै (उपवीति [सव्य] रएरै) पिण्ड दिएका वेदिकामा शङ्ख-चक्र लेखोस् र तिनको जौहरुले पूजा गरोस्, अनि जनै र उपर्ना दाइने काँदमा पारेर (प्राचीनावीति [अपसव्य] भएर) "ओ३म् गयायाम्" इत्यादि मन्त्रले पिण्डसहित टपरि पिण्डवेदिकामा राखोस्। अनि जनै र उपर्ना देउरे काँदमा पारेर (उपवीति [सव्य] भएर) "ओ३म् वसन्ताय नमस् तुभ्यम्" इत्यादि मन्त्रले जल-चन्दन-फुलहरुले पिण्डको पूजा गरोस्। अनि कर्पूरदीप पनि देओस्। कोइ याँहाँ पत्नी, भाइ, छोरा, बुआरि, नाति इत्यादिले पनि पिण्डपूजा गरुन् भञ्चन्।*

स्वयमेव जनार्दनः। तं दृष्ट्वा पुण्डरीकाक्षं मुच्यते च ऋणत्रयात्" इति मन्त्रेण पिण्डयुतां पत्रपात्रीं वेदिकायां निदधीत। तत **उपवीती** भूत्वा जलगन्धपुष्पादिभिः पिण्डं पूजयेदेभिर् मन्त्रैः– "ओ३म् वसन्ताय नमस् तुभ्यं ग्रीष्माय च नमोनमः। वर्षाभ्यश् च शरत्संज्ञऋतवे च नमोनमः। हेमन्ताय नमस् तुभ्यं नमस् ते शिशिराय च। माससंवत्सरेभ्यश् च दिवसेभ्यो नमोनमः" इति। ततः कर्पूरदीपमपि दद्यात्। अत्राऽन्ये केचिद् सर्वे गृह्याः पत्नी-भ्रातृ-पुत्र-स्नुषा-पौत्रादयोऽपि पिण्डं पूजयेयुरिति वदन्ति।)

(प्रथमार्घपात्रस्योत्तानीकरणम्)

[१८४] ततः प्राचीनावीती भूत्वा श्राद्धकर्ता न्युब्जीकृतं प्रथममर्घपात्रमुत्तानं कुर्यात्।

(दक्षिणादानम्)

[१८५] ततः श्राद्धकर्ता उपवीती **भूत्वाऽप उपस्पृश्य ऋजुदर्भतिलजलं वैश्वदेविक-**

---

१८४. अनि प्राचीनावीति (अपसव्य) भएर श्राद्ध गर्नेले अगि घोउटो पारिएको प्रथम अर्घपात्रलाइ उत्तानो पारोस्।

१८५. अनि श्राद्ध गर्नेले उपवीति (सव्य) भएर आचमन गरेर सोजा कुश तिल र जल लिएर वैश्वदेविकब्राह्मणलाइ दिइने दक्षिणा-द्रव्य पनि लिएर "ओ३म् अस्मत्पितृ" इत्यादि वाक्य भनेर वैश्वदेविकब्राह्मणलाइ देओस्।

ब्राह्मणदक्षिणाद्रव्यं चाऽऽदाय "ओ३म् इहाऽद्य मासिकाऽपरपक्षश्राद्धाऽनुकल्पतया नभस्याऽपरपक्षरूपमहालयप्रयुक्तत्वेन कृताभ्याम् अस्मत्-पितृ-पितामह-प्रपितामहानाम् अस्मन्-मातामह-प्रमातामह-वृद्धप्रमातामहानां च श्राद्धाभ्यां सम्बद्धस्य तन्त्रेण कृतस्यैतस्य वैश्वदेविकस्य (पुरूरवोमाद्रवोनाम्नां विश्वेषां देवानाम्) श्राद्धस्य प्रभावस्य सम्पत्तेः सिद्धये दक्षिणात्वेन देयस्य हिरण्यस्य मूल्यत्वेनोपकल्पितमेतन् नाणकपत्ररूपं द्रव्यं (विष्णुदैवतं) तुभ्यं कुशवटुशर्म्मणे काश्यपगोत्राय ब्राह्मणायाऽहं सम्प्रददे, ओ३म् तत् सन् न मम" इत्युक्त्वा वैश्वदेविकब्राह्मणाय दद्यात्।

[१८६]तत उपवीत्येव श्राद्धकर्ता ऋजुदर्भतिलजलं पितृब्राह्मणदक्षिणाद्रव्यं चाऽऽदाय "ओ३म् इहाऽद्य मासिकाऽपरपक्षश्राद्धाऽनुकल्पतया नभस्याऽपरपक्षरूपमहा-

---

१८६. अनि श्राद्ध गर्नेले उपवीति (सव्य) नै रएर पितृब्राह्मणलाइ दिइने दक्षिणाद्रव्य लिएर "ओ३म् अस्मत्पितृ" इत्यादि वाक्य भनेर पितृब्राह्मणलाइ देओस्।

लयप्रयुक्तत्वेन कृतस्यैतस्य अस्मत्-पितृ-पितामह-प्रपितामहानां श्राद्धस्य प्रभावस्य सम्पत्तेः सिद्धये दक्षिणात्वेन देयस्य हिरण्यस्य (रजतस्य वा) मूल्यत्वेनोपकल्पित-मेतन् नाणकपत्ररूपं द्रव्यं (विष्णुदैवतं) तुभ्यं कुशवटुशर्म्मणे काश्यपगोत्राय ब्राह्मणायाऽहं सम्प्रददे, ओ३म् तत् सन् न मम" इत्युक्त्वा पितृब्राह्मणाय दद्यात्।

[१८७]तत उपवीत्येव श्राद्धकर्ता ऋजुदर्भतिलजलं मातामहब्राह्मणदक्षिणाद्रव्यं चाऽऽदाय "ओ३म् इहाऽद्य मासिकाऽपरपक्षश्राद्धाऽनुकल्पतया नभस्याऽपरपक्षरूप-महालयप्रयुक्तत्वेन कृतस्यैतस्य अस्मन्-मातामह-प्रमातामह-वृद्धप्रमातामहानां श्राद्धस्य प्रभावस्य सम्पत्तेः सिद्धये दक्षिणात्वेन देयस्य हिरण्यस्य (रजतस्य वा) मूल्यत्वेनोपकल्पितमेतन् नाणकपत्ररूपं द्रव्यं (विष्णुदैवतं) तुभ्यं कुशवटुशर्म्मणे

---

१८७. अनि श्राद्ध गर्नेले उपवीति (सव्य) नै रएर मातामहब्राह्मणलाइ दिइने दक्षिणाद्रव्य लिएर "ओ३म् अस्मन्मातामह" इत्यादि वाक्य भनेर मातामहब्राह्मणलाइ देओस्।

काश्यपगोत्राय ब्राह्मणायाऽहं सम्प्रददे, ओ३म् तत् सन् न मम" इत्युक्त्वा मातामह-ब्राह्मणाय दद्यात्।

[१८८]ततः श्राद्धकर्ता ऋजुकुशतिलजलं पत्रपात्रस्थां नाणक-नाणकपत्रादिरूपां भूयसीं दक्षिणां चाऽऽदाय "ओ३म् इहाऽद्य मासिकापरपक्षश्राद्धानुकल्पतया नभस्यापरपक्षरूपमहालयप्रयुक्तत्वेन कृतस्य अस्मत्-पितृ-पितामह-प्रपितामहानां श्राद्धेन, अस्मन्-मातामह-प्रमातामह-वृद्धप्रमातामहानां श्राद्धेन च सम्बद्धस्य तन्त्रेण प्रयुक्तस्यैतस्य विश्वेषां देवानां श्राद्धस्य, मासिकापरपक्षश्राद्धानुकल्पतया नभस्यापरपक्षरूपमहालयप्रयुक्तत्वेन कृतस्य अस्मत्-पितृ-पितामह-प्रपितामहानां श्राद्धस्य, तथैव

---

१८८. अनि श्राद्ध गर्नेले सोजा कुश तिल जल र टपरिमा राखिएको मुद्रा मुद्रापत्र इत्यादि रूपको भूयसी दक्षिणा लिएर "ओ३म् इहाऽद्य" इत्यादि दानवाक्यले उत्सर्ग गरि त्यो ब्राह्मण, कुमार, कुमारी, सुवासिनी (बाउका घरमा नै रअने दिन खाएकि बुडिकन्ने स्त्री अथवा घर खान नसक्नाले वा अन्य कुनै कारणले माइतिका आश्रयमा रएकि स्त्री), दीन, दुःखि, अनाथ इत्यादिलाइ यथोचित रूपमा बाँडेर यथासमयमा यथासम्भव देओस्।

कृतस्य अस्मन्-मातामह-प्रमातामह-वृद्धप्रमातामहानां श्राद्धस्य च प्रभावस्य सम्पत्तेः पूर्णतमतां कामयमानोऽहं भूयस्या दक्षिणाया रूपेण देयस्य हिरण्यस्य (रजतस्य वा) मूल्यत्वेनोपकल्पितमेतन् नाणक-नाणकपत्रादिरूपं द्रव्यं (विष्णुदैवतं) यथा-सम्भवं नानानामगोत्रब्राह्मण-कुमार-कुमारी-सुवासिनी-दीनाऽनाथादिभ्यो यथार्हं विभज्य यथाकालं दातुमुत्सृज्ये, ओ३म् तत् सन् न मम" इति भूमौ उत्सृज्य यथा-भागं विभज्य यथासम्भवं यथाकालं दद्यात्।

(वैश्वदेविकब्राह्मणविसर्जनम्)

[१८९]ततः श्राद्धकर्ता उपवीत्येव वैश्वदेविकब्राह्मणम् "ओ३म् विश्वे देवाः प्रीयन्ताम् इत्युच्यताम्" इत्यधीच्छेत्। वैश्वदेविकब्राह्मणश् च "ओ३म् विश्वे देवाः

१८९.अनि श्राद्ध गर्नेले उपवीति (सव्य) नै रएर वैश्वदेविकब्राह्मणलाइ "ओ३म् विश्वेदेवाः प्रीयन्ताम्" भन्नुहोस् भनेर अनुरोध गरोस्। वैश्वदेविकब्राह्मणले पनि "ओ३म् विश्वे देवाः प्रीयन्ताम्" भनुन्।

प्रीयन्ताम्" इति ब्रूयात्।

[१९०]**ततः श्राद्धकर्ता** उपवीत्येव **"ओ३म् वाजेवाजेऽवत वाजिनो नो धनेषु विप्राऽ अमृताऽ ऋतज्ञाः। अस्य मध्वः पिबत मादयध्वन् तृप्ता यात पथिभिर् देवयानैः" इति वैश्वदेविकब्राह्मणं** (कुशाग्रैः स्पृष्ट्वा) **विसर्जयेत्।**

(पित्रादिब्राह्मणविसर्जनम्)

[१९१]**ततः श्राद्धकर्ता** प्राचीनावीती **भूत्वा पितृब्राह्मणम् "ओ३म् वाजेवाजेऽवत वाजिनो नो धनेषु विप्राऽ अमृताऽ ऋतज्ञाः। अस्य मध्वः पिबत मादयध्वन् तृप्ता**

---

१९०. अनि श्राद्ध गर्नेले उपवीति (सव्य) नै रएर "ओ३म् वाजेवाजे" इत्यादि मन्त्रले वैश्वदेविकब्राह्मणलाइ *(कुशाका टुप्पाले छोएर)* विसर्जन गरोस्।

१९१. अनि श्राद्ध गर्नेले प्राचीनावीति (अपसव्य) भएर "ओ३म् वाजेवाजे" इत्यादि मन्त्रले पितृब्राह्मणलाइ *(कुशहरुका फेदले छोएर)* विसर्जन गरोस्।

सात पथिभिर् देवयानैः" इति (कुशमूलैः स्पृष्ट्वा) **विसर्जयेत्।**

[१९२]**ततः श्राद्धकर्ता** प्राचीनावीती **एव** मातामहब्राह्मणं च **"ओ३म् वाजेवाजेऽवत वाजिनो नो धनेषु विप्राऽ अमृताऽ ऋतज्ञाः। अस्य मध्वः पिबत मादयध्वन् तृप्ता सात पथिभिर् देवयानैः" इति** (कुशमूलैः स्पृष्ट्वा) **विसर्जयेत्।**

(ब्राह्मणानां व्रजनं श्राद्धकर्तुर् ब्राह्मणाऽनुव्रजनं च)

[१९३]**ततो ब्राह्मणाः स्वगृहं प्रति व्रजेयुः।**

[१९४]**तदा श्राद्धकर्ता** प्राचीनावीती **एव "ओ३म् आ मा वाजस्य प्रसवो जगम्यादेमे**

---

१९२. अनि श्राद्ध गर्नेले प्राचीनावीति नै रएर "ओ३म् वाजेवाजे" इत्यादि मन्त्रले मातामहब्राह्मणलाइ *(कुशहरुका फेदले छोएर)* विसर्जन गरोस्।

१९३. अनि ब्राह्मणहरु आँफ्ना घरतिर प्रस्थान गरुन्।

१९४. अनि श्राद्ध गर्नेले प्राचीनावीति (अपसव्य) नै रएर "ओ३म् आ मा वाजस्य" इत्यादि मन्त्र पडेर आँफ्नो घरका आँगनको

द्यावापृथिवी विश्वरूपे। आ मा गन्ताम् पितरा मातरा चाऽऽ मा सोमोऽ अमृतत्वेन गम्यात्" इति मन्त्रं पठित्वा आ स्वगृहाङ्गनद्वाराद् वा अष्ट पदानि वा ब्राह्मणाननुव्रजेत्।

(प्रदक्षिणीकरणम्)

१९५**"ततो ब्राह्मणा एकत्राऽवतिष्ठेरन्। श्राद्धकर्ता च** उपवीती **भूत्वा ब्राह्मणान् प्रदक्षिणीकृत्य** ("अद्य मे सफलं जन्म भवत्पादाब्जवन्दनात्। अद्य मे वंशजाः सर्वे याता वोऽनुग्रहाद् दिवम्॥ पत्रशाकादिदानेन क्लेशिता यूयमीदृशाः। तत्क्लेशमिह सञ्जातं विस्मृत्य क्षन्तुमर्हथ" इत्यादिकप्रियवाक्यप्रयोगं कृत्वा नमस्कृत्य च) **आगम्य गृहं प्रविशेत्। ब्राह्मणाश् च स्वंस्वं गृहं गच्छेयुः।**

ढोकासम्म वा आठ पाइलासम्म ब्राह्मणहरुका पछि लागोस्।

१९५. अनि ब्राह्मणहरु एकै ठाममा उभ्बियुन्। श्राद्ध गर्नेवाला पनि उपवीति (सव्य) भएर ब्राह्मणहरुको प्रदक्षिणा गरेर *("अद्य मे सफलं जन्म" इत्यादि प्रियवाक्य बोलेर ब्राह्मणहरुलाइ नमस्कार गरेर)* आएर घरमा पसोस्, ब्राह्मणहरु आँफ्ना-आँफ्ना घर जाउन्।

(पौराणमन्त्र-विष्णुहृदयमन्त्र-पठनादिकम्)

[१९६](ततः श्राद्धदेशमागत्य **उपवीत्येव** श्राद्धकर्ता "ओ३म् देवताभ्यः पितृभ्यश् च महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमोनमः" इति त्रिः पठेत्। "यो विष्णुहृदयं मन्त्रं श्राद्धेषु नियतः पठेत्। पितरस् तर्पितास् तेन पयसा च घृतेन च॥ चतुर्भिश् च चतुर्भिश् च द्वाभ्यां पञ्चभिरेव च। हूयते च पुनर् द्वाभ्यां स मे विष्णुः प्रसीदतु॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥ (ओ३म् अच्युताय नमः, ओ३म् अच्युताय नमः, ओ३म् अच्युताय नमः)" इति विष्णुहृदयमन्त्रं च पठेत्। ततः "प्रमादात् कुर्वतां कर्म प्रच्यवेताऽध्वरेषु यत्। स्मरणादेव तद् विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥ ओ३म् यत् कृतं तत् सुकृतमस्तु यन् न कृतं तच् छ्रीविष्णोः प्रसादात् सर्वं परिपूर्णमस्तु" इत्युच्चार्य, "आयुर् विद्यां धनं पुत्रान् राज्यं सौख्यं त्रिविष्टपम्। मोक्षं चाऽपि प्रयच्छन्ति पितरः श्राद्धतर्पिताः" इति श्राद्धमाहात्म्यं च पठेत्।

---

१९६. *अनि श्राद्धस्थलमा आएर श्राद्ध गर्नेले जनै र उपर्ना देउरे काँदमा नै पारेर (उपवीति [सव्य] नै रएर) "ओ३म् देवताभ्यः" इत्यादि तिनपल्ट पढोस्। अनि विष्णुहृदयमन्त्रको पाठको "यो विष्णुहृदयम्" इत्यादि माहात्म्यले युक्त "चतुर्भिश्च" इत्यादि विष्णुहृदय-मन्त्र पढोस्। अनि "प्रमादात् कुर्वतां कर्म" इत्यादिको उच्चारण गरेर "आयुर् विद्यां धनं पुत्रान्" इत्यादि श्राद्धमाहात्म्य पनि पढोस्।*

[१९७]ततः देव-पितृ-कर्मपात्राऽवशिष्टकुशादिकमादाय– "ओ३म् कायेन वाचा मनसेन्द्रियैर् वा बुद्ध्याऽऽत्मना वाऽनुसृतेः स्वभावात्। करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पये तत्॥ अनेन पितृयज्ञेन प्रीयतां भगवानिह। मया भक्त्या कृतं सर्वं तत्सद्ब्रह्मार्पणं भवेत्" इत्युक्त्वा कुशादिकं भूमौ विसृजेत्। ततः **प्राचीनावीती** पाणिना दीपं प्रच्छाद्य **उपवीती** आचम्य पाणी प्रक्षालयेत्।)

(उच्छिष्टोद्वासनादिकम्)

[१९८]ततः कुशवटून् ब्राह्मणान् कृत्वा श्राद्धं कृतं चेत् तेभ्यो दत्तं घृतौदनादि-भोज्यादिकम् अग्नौ अप्सु वा क्षिपेत्, गवे दद्याद् वा।

---

१९७. *अनि देव-पितृ-कर्मपात्रमा रएका कुशादि लिएर "ओ३म् कायेन वाचा" इत्यादि भनेर ति कुशादि भैंमा छोडोस्। अनि श्राद्ध गर्नेले जनै र उपर्ना दाइने काँदमा पारेर (प्राचीनावीति [अपसव्य] भएर) हातले बत्ति छोपेर जनै र उपर्ना देउरे काँदमा पारेर (उपवीति [सव्य] भएर) आचमन गरेर दुवै हात धोओस्।*

१९८. अनि कुशवटुहरुलाइ नै ब्राह्मण बनाएर श्राद्ध गरिएको हो भने ति कुशवटुहरुलाइ दिइएका भुजा इत्यादि भोज्यादि पदार्थ आगामा वा पानिमा हालोस् अथवा गाइलाइ देओस्।

१९९ततो द्विजोच्छिष्टोद्वासनं तदैव कुर्यात् कारयेद् वा। अथवा सति सम्भवे श्राद्धशेषभोजनान्ते दिनान्ते एव द्विजोच्छिष्टोद्वासनं कुर्यात् कारयेद् वा।

(पिण्डप्रतिपत्तिः)

२००दिनान्त एव द्विजोच्छिष्टोद्वासने कर्तव्येऽपि गृहप्रवेशे जाते यथास्थिति कुशब्राह्मणेभ्यो दत्तस्य भोज्यादिकस्य प्रतिपत्तौ च जातायां श्राद्धकर्ता प्राचीनावीती भूत्वा पिण्डान् विकरं च गवेऽजाय ब्राह्मणाय वा दद्यात्; अग्नौ जले वाऽपि प्रक्षिपेद् वा।

---

१९९. अनि ब्राह्मणभोजनको जुठो उठाउने काम तेसै वेला गरोस् वा गराओस्। अथवा सम्भव भएमा आँफुहरुले पनि श्राद्धशेष भोजन गरिसकेपछि दिनका अन्तमा (घाम अस्ताउने वेलामा) ब्राह्मणभोजनको जुठो उठाउने काम गरोस् अथवा गराओस्।

२००. दिनका अन्तमा नै ब्राह्मणभोजनको जुठो उठाउने काम गरिने भए पनि गृहप्रवेश भएपछि, परिस्थितिअनुसार कुशब्राह्मण-हरुलाइ दिइएका भोज्यादि आगामा हाल्ने इत्यादि काम पनि भएपछि श्राद्ध गर्नेले प्राचीनावीति (अपसव्य) भएर पिण्डहरु र विकर पनि बुडो गोरुलाइ वा बुडो बोकालाइ वा ब्राह्मणलाइ देओस् अथवा आगामा वा पानिमा हालोस्।

[२०१]ततः श्राद्धकर्ता प्राचीनावीत्येव कुशाङ्गुलीयकं त्यक्त्वा हस्तौ धावित्वा प्राङ्मुख उपवीती भूत्वा आचामेत्।

(श्राद्धशेषभोजनम्)

[२०२]ततोऽनग्निकः श्राद्धकर्ता लौकिकाग्निसम्पाद्य-पञ्चमहायज्ञकारी चेत् श्राद्धावशेषेणैवाऽन्नेन वैश्वदेवाख्यं पञ्चमहायज्ञकर्माऽपि स्वाध्यायाऽध्ययनरूप-

---

२०१. अनि श्राद्ध गर्नेले प्राचीनावीति (अपसव्य) नै रएर कुशको अम्ठि त्यागेर हात धोएर पूर्वतिर फर्केर उपवीति (सव्य) भएर आचमन गरोस्।

२०२. अनि श्रौताग्नि वा गृह्याग्नि नभएको भएपनि श्राद्ध गर्नेले लौकिकाग्निमा नित्य पञ्चमहायज्ञ गर्ने गरेको भए स्वाद्ध्याया-ध्ययनरूप (दिनदिनै गरिने वेदपाठरूप) ब्रह्मयज्ञ छोडेर वैश्वदेवकर्म पनि भनिने पञ्चमहायज्ञकर्मभित्रका देवयज्ञादि अरु चार यज्ञ (देवयज्ञ, भूतयज्ञ, पितृयज्ञ र मनुष्ययज्ञ) श्राद्धशेष अन्नले नै गरेर इष्टमित्रहरुका साथमा पितृले भोग गरेका सबै प्रकारका अन्न यथेष्टभाग खाओस्॥

ब्रह्मयज्ञवर्जं सम्पाद्य इष्टैः सह पितृसेवितं सर्वप्रकारकमन्नं यथेष्टभागं भुञ्जीत॥

॥ इति श्रीगुरुमुखोच्चारणानूच्चारणरूपाद्ध्ययन-समवाप्त-स्वशाखा-मन्त्र-ब्राह्मण-कल्पसूत्रेण श्रुति-स्मृति-पुराण-पारायण-परायणेनाऽवलोकित-नानाधर्मशास्त्रनिबन्धेन वार्तावृत्तिगृहस्थेन गण्डकीप्रदेशमध्यस्थत्रितुङ्गाचलाङ्कितजनपदान्तर्गत-चुँदिताम्रकूट-तिरर्श्चीनपानीयक-ग्रामाऽभिजनेन नैपालभाषाऽऽदिकवि-भानुभवताऽऽचार्य-प्रविख्यापिते श्रीकृष्णाऽऽचार्यवंशे जातेन कौण्डिन्न्यायनेनाऽऽचार्येण शिवराजशर्मणा द्विजोत्तमेन कृता एतत्पद्धतिकारेणैव स्वजन्मतः सप्तषष्टितमे वर्षे वर्तमानेन परिष्कृत्य प्रस्तुता च कात्यायनमुनिकृतश्राद्धकल्पसूत्राऽनुसारिणी माध्यन्दिनीयवाजसनेयि-शुक्लयजुर्वेद-शाखाध्यायिनां निरग्निकानां द्विजानां मासिकापरपक्षश्राद्धानुकल्परूपस्य नभस्यापरपक्षरूपमहालयप्रयोज्यस्य **पार्वणश्राद्धस्य पद्धतिः** समाप्ता।

एतिमा श्रीयुत गुरुका मुखले उच्चारण गरेपछि गरिएको उच्चारण गरि गरिएका अध्ययनले आँफ्ना शाखाका मन्त्रसंहिता, ब्राह्मणग्रन्थ र कल्पसूत्र समाप्त गरेका, श्रुति-स्मृति-पुराणको पारायणमा लागिरअने, नाना प्रकारका धर्मशास्त्रनिबन्धग्रन्थहरु हेरेका, गण्डकी प्रदेशका मध्यमा रहेका तनुङ-(तनहुँ)जनपदभित्र (जिल्लाभित्र) पर्ने चुँदितामाकोट-तेर्सेपानि गाममा पुर्खेउलि थलो भएका, नेपालि भाषाका आदिकवि भानुभक्त आचार्यले विशेष प्रख्यात गराइएका श्रीकृष्णाचार्यका वंशमा जन्मेका, कुण्डिन ऋषिका युवापत्य वार्तावृत्ति गृहस्थ आचार्य शिवराजशर्मा ब्राह्मणले बनाइएको आँफ्नो जन्मदेखि गनिएका सतसट्ठियौं वर्षमा हिंड्दै गरेका पद्धतिकारले नै परिष्कृत गरेर प्रस्तुत गरिएको कात्यायनश्राद्धकल्पसूत्रअनुसारको गृह्याग्नि नभएका माध्यन्दिनीयवाजसनेयि-शुक्लयजुर्वेदशाखाध्यायि द्विजातिको मासिकाऽपरपक्षश्राद्धको अनुकल्पका रूपमा नभस्यमासको अपरपक्षमा (भाद्रकृष्णपक्षरूप महालयमा) गरिने **पार्वणश्राद्धको पद्धति** समाप्त भयो।

परिशिष्ट

१. वैदिक-कालज्ञानम्

(क) वैदिक कालज्ञानको आवश्यकता

लगधमुनिले वेदअनुसार वेदाङ्गज्योतिषमा बताएका वैदिक संवत्सर, अयन, ऋतु, मास, अधिकमास इत्यादि शासकीय पञ्चाङ्गनिर्णायकसमितिबाट स्वीकृत अवैदिक सूर्यसिद्धान्तादिमूलक चल्तिका पात्रामा लेखिएका संवत्सर, अयन, ऋतु, मास इत्यादिभन्दा फरक छन्। वैदिक संवत्सर-परिवत्सरादिसित टम्म मिलेर चल्ने प्रभव-विभवादि षष्टि-संवत्सर **चान्द्र** हुन् भने चल्तिका पात्राका प्रभव-विभवादि षष्टिसंवत्सर **बार्हस्पत्य** हुन्। वेदाङ्गज्योतिषअनुसार दक्षिणायन लागि सक्ता पनि चल्तिका पात्रामा उत्तरायण नै मानिएको हुञ्छ, उत्तरायण लागि सक्ता पनि दक्षिणायन नै मानिएको हुञ्छ; ग्रीष्मऋतु लागि सक्ता पनि वसन्त ऋतु नै मानिएको हुञ्छ। वैदिक चान्द्र मैनाहरु अमान्त हुन् भने चल्तिका अवैदिक पात्रामा लेखिएका चान्द्र मैनाहरु पूर्णिमान्त छन्। श्रौत-स्मार्त धर्मकर्मका लागि अमान्त मास नै ग्राह्य हुन्, पूर्णिमान्त चान्द्र मास त शासकादिका लौकिक व्यवहारका लागि हुन्। तसर्थ वैदिक चान्द्रमासमा र चल्तिका पात्राका चान्द्रमासमा धेरै नै फरक पर्न जाञ्छ। प्रायः शुक्लपक्षमा दुइ मास र कृष्णपक्षमा एक मास फरक पर्न जाञ्छ। तपोमासको (वैदिक माघमासको) शुक्लपक्ष लागि सक्ता पनि पञ्चाङ्ग-निर्णायक-समितिले स्वीकृत गरेका चल्तिका पात्रामा कैले मार्गशीर्षशुक्लपक्ष भन्ने र कैले पौषशुक्ल भन्ने पनि लेखिएको हुञ्छ। एसरि मासमा (मैनामा) धेरै नै फरक पर्न जाञ्छ। वैदिक अधिकमास चल्तिका पात्राका अधिकमासभन्दा अत्यन्तै फरक छन्। वैदिक अधिकमास (मलमास) आषाढमा वा पौषमा मात्र पर्छ। अरु मैनामा पर्दैन। यो कुरा नेपालको लिच्छविकालदेखिको एक हजार वर्षको इतिहासबाट पनि समर्थित छ। वैदिक अधिकमास

वेदाङ्गज्योतिषको **"घर्मवृद्धिरपां प्रस्थः"** (श्लो.८) इत्यादि वचनबाट समेत सिद्ध हुने दृक्सिद्ध सौर अयनका आधारमा निश्चित हुन्छ। एक अयनमा (उत्तरायणमा वा दक्षिणायनमा) सात ओटा अमावास्या (अम्सि) परेमा सातौँ अम्सिमा पूर्ण हुने चान्द्रमास अधिकमास (मलमास) मानिन्छ। वेदवेदाङ्गमा नभएका मेष, वृष इत्यादि राशिका आधारमा सिद्धान्त-शिरोमणि इत्यादि ग्रन्थमा गरिएको सौरसङ्क्रान्ति नपरेको शुक्लपक्षप्रतिपदादेखि कृष्णपक्षअमावास्यासम्मको चान्द्रमास अधिकमास (मलमास) हुन्छ भन्ने **"असङ्क्रान्तिमासोऽधिमासः स्फुटं स्यात्"** इत्यादि विदेशिमूलका विचारका आधारमा चलेका अर्वाचीन परिभाषा वैदिक-सनातन-वर्णाश्रमधर्ममा मान्य हुँदैनन्। वैदिक धर्ममा अनादि अनपभ्रष्ट परम्पराबाट आएका कुरा मात्र मान्य हुन्छन्। वैदिक कालगणनामा क्षयमास त हुँदैहुँदैन। तसर्थ वैदिक श्रौत-स्मार्त धर्मकर्मका लागि वेदोक्त कालको निरूपण गर्न र सङ्कल्पमा कालको उल्लेख गर्न पनि मूल वैदिक शास्त्रव्यवस्था नबुजेका र मूल वैदिक शास्त्रमा समुचित श्रद्धा र आस्था पनि नभएका नास्तिकजस्ता फलादेशपरक ज्योतिषिहरुले बनाएका र तेस्तै खाले शासकीय पञ्चाङ्गनिर्णायकहरुले शासकीय बलका भरमा निर्णीत गरेका चल्तिका अवैदिक पात्रा प्रमाण हुँदैनन्। नेपालमा अत्यधिक मात्रामा रहेका माध्यन्दिनीय-वाजसनेयि-शुक्लजुर्वेद-शाखाध्यायि ब्राह्मणहरुका र तिनका शिष्ययजमानहरुका विवाह-व्रतबन्धादि कृत्य यथासम्भव पारस्करगृह्यसूत्रका विधानअनुसार नै हुन पर्ने र पारस्करगृह्यसूत्रमा **"उदगयन आपूर्य-माणपक्षे पुण्याहे कुमार्याः पाणिं गृह्णीयात्"** (१।४।५) भन्ने वचन हुनाले विवाह वेदाङ्गज्योतिषादि वैदिक ग्रन्थअनुसारको उत्तरायणमा मात्र हुन पर्नेमा दक्षिणायनमा निरयण वृश्चिकमासमा (मङ्सिरमा) र वेदाङ्गज्योतिषादि वैदिक ग्रन्थअनुसार दक्षिणायन लागि सकेपछि निरयण मिथुनमासमा (असारमा) पनि विवाहलग्न दिने, शुक्लपक्षमा नै विवाह हुन पर्नेमा कृष्णपक्षमा पनि विवाहलग्न दिने तथा पारस्करगृह्यसूत्रमा **"अथैनां सूर्यमुदीक्षयति तच् चक्षुरिति"** (१।८।७) भन्ने वचन भएकाले विवाहकर्मका बिचमा नै वधूलाइ सूर्यदर्शन गराउन पर्ने हुँदा दिनमा नै विवाह हुन पर्नेमा रातमा पनि विवाहलग्न

दिने, वैदिक शास्त्रव्यवस्थाको भरपर्दो ज्ञान नभएका अज्ञ वा वैदिक शास्त्रमा श्रद्धा नभएका नास्तिक जस्ता पञ्चाङ्गकारले बनाएका र तेस्तै अज्ञ वा नास्तिक जस्ता पञ्चाङ्गनिर्णायकहरुले शास्त्रविचारविमुख भै शासकीय बलका भरमा निर्णीत गरेका पात्राहरु श्रौतस्मार्तकर्मका कालका निरूपणका लागि र तिनका सङ्कल्पमा कालको उल्लेख गर्नका लागि पनि सर्वथा अनुसरणीय हुँदैनन्। तसर्थ तिनका भरमा मात्र श्रौत-स्मार्तकर्मका संवत्सर-अयन-ऋतु-मास-अधिकमासादि कालको निर्णय गर्न हुँदैन। वेदाङ्गज्योतिषमा बताइएको मूल वैदिक कालगणनासिद्धान्त राम्ररि बुजेर चल्तिका पात्राको वा दृक्सिद्धपञ्चाङ्गको सहायता लिएर श्रौत-स्मार्तकर्मका लागि संवत्सर-अयन-ऋतु-मास-अधिमासादिको निर्णय गर्न सकिन्छ। वैदिक धर्मका र मोक्षका विषयमा उपनयनपूर्वक वैध रूपमा अध्ययन गरिने वेद-वेदाङ्गग्रन्थहरु नै मूल रूपमा प्रमाण मानिन्छन्। तसर्थ लगधमुनिप्रोक्त **"पञ्चसंवत्सरमयम्"** इत्यादि वेदाङ्गज्योतिषग्रन्थका प्रतिकूल निर्णय पनि दिने सूर्यसिद्धान्त, सिद्धान्तशिरोमणि, महूर्तचिन्तामणि, खण्डखाद्यक, भास्वती इत्यादि ग्रन्थ श्रौत-स्मार्त-धर्मकर्मका लागि गरिने संवत्सर-अयन-ऋतु-मास-अधिकमास-पक्ष-तिथिहरुका गणनामा सर्वथा प्रमाण हुँदैनन्। एस विषयमा स्वाद्ध्यायशाला-कुटुम्वले वाराणसीको चौखम्बाविद्याभवनबाट प्रकाशित गराएको (२००५ क्रै.) **वेदाङ्गज्योतिषको कौण्डिन्न्यायन-**व्याख्यानका भूमिकामा विस्तृत रूपमा स्पष्टीकरण गरिएको छ। वेद-वेदाङ्ग शास्त्रमा र तिनमा प्रतिपादित धर्ममा आस्था भएका विज्ञजनहरुले एस विषयमा राम्ररि ध्यान दिनु र कुनै विमति वा शङ्का भएमा खुला रूपमा लिखित छलफल गर्नु आवश्यक हुन आएको छ। तसर्थ वेदाङ्गज्योतिषमा बताइएको मूल वैदिक कालगणनासिद्धान्तको सार तल सङ्क्षेपमा बताइन्छ। योग-वार-राशिहरुको मूल वैदिकवाङ्मयमा उल्लेख नभएकाले र भरतनाट्यशास्त्रसम्ममा पनि (द्र.- मूलमात्र-संस्करण २।३४, २।३८, २।४९, २।५१, ३।१५, ३।१६, ३।८१; अभिनवभारतीयुक्त संस्करण २।३२, २।३६, २।४२-४४, ३।१६, ३।१८, ३।८१) तिनको उल्लेख नभएकाले श्रौत-स्मार्तकर्मका सङ्कल्पमा तिनको उल्लेख आवश्यक देखिँदैन।

(ख) वैदिक-कालनिरूपणम्

तिथिश् च करणम् भञ् च योगोऽथो वासराधिपः।
दिनरूपस्य कालस्य पञ्चाऽङ्गानीति लौकिकाः ॥१॥

सूर्योदयात् प्रभृति यो यावत् सूर्योदयम् परम्।
कालस् तत् सावनदिनं वैदिकैः परिकीर्तितम् ॥२॥

[वैदिक धार्मिक कृत्यहरु अमुक (फलाना) अयनमा, अमुक ऋतुमा, अमुक मैनामा, अमुक पक्षमा, अमुक तिथिमा, अमुक नक्षत्रमा, अमुक वेलामा गर्नु भन्ने विविध विधानहरु वेदादिशास्त्रमा छन्। तसर्थ वैदिक अयन, ऋतु, मास, पक्ष, तिथि इत्यादिको ज्ञान आवश्यक हुन्छ। वैदिक अयन, ऋतु, मास इत्यादि चल्तिका सूर्यसिद्धान्तादिमूलक पात्रामा लेखिएका अयन, ऋतु, मास इत्यादिभन्दा फरक छन्, वैदिक अयनादि मुख्य रूपमा चान्द्र हुन्। वैदिक कर्मका सङ्कल्पादिमा चल्तिको पात्राका भरमा अयन, ऋतु इत्यादिको उल्लेख गर्नु उचित हुँदैन। नामकरण (न्वारान), अन्नप्राशन (पास्नि, भातख्वाइ), उपनयन (व्रतबन्ध), विवाह, और्ध्वदेहिककर्म (किरिया), श्राद्ध, श्रौतस्मार्तकर्म इत्यादि वैदिक धर्मकृत्य हुन्। तिनको समयनिर्धारण गर्दा र सङ्कल्प गर्दा लगधमुनिप्रोक्त वेदाङ्गज्योतिषअनुसार निश्चित गरिएका काललाइ लिनपर्छ। लगधमुनिप्रोक्त **वेदाङ्गज्योतिष**को संस्कृतमा विस्तृत भूमिका तथा **कौण्डिन्न्यायनव्याख्यान** भन्ने व्याख्या र हिन्दिमा सङ्क्षिप्त भूमिका तथा व्याख्या पनि वाराणसीको चौखम्बा विद्याभवनबाट प्रकाशित गराइसकिएको छ (२००५ सन्)। तेसैको मुख्य आधारमा सङ्क्षिप्त वैदिक कालज्ञान याँहाँ प्रस्तुत गरिएको हो। अव संस्कृत श्लोकहरुको अर्थ र स्पष्टीकरण याँहाँ प्रस्तुत गरिन्छ।]

तिथि, करण, नक्षत्र, विष्कम्भादि योग र वार इ पाँच दिनरूपकालका अङ्ग हुन् भन्ने कुरा लौकिक मान्छेहरु भन्छन् [तेसमा सावनदिनभन्दा अभिन्न तिथिको र नक्षत्रको मात्र उल्लेख वेदमा पाँइन्छ। करण, योग र वार आथर्वण ज्योतिषमा पाँइन्छन्। तिनमा योगको उल्लेख स्पष्ट छैन। हरिवंश-चरकसंहिता-सुश्रुतसंहिता-भरतनाट्यशास्त्र-आश्वलायनगृह्यसूत्रपरिशिष्टहरुमा पनि योगको उल्लेख छैन। वारको उल्लेख महाभारतमा र मनुस्मृति-याज्ञवल्क्यस्मृतिहरुमा पनि पाइँदैन। वारको धारणा अरबदेशहरुबाट भारतवर्षमा पसेको मानिन्छ। मूल वैदिक धर्ममा वारको महत्त्व छैन। तेसैले पञ्चाङ्ग भन्ने कुरा पनि मूल वैदिक परम्पराको हैन। पात्रोलाइ तिथिपत्र भन्नु वैदिकपरम्पराको अनुकूल कुरा हो] ॥१॥

एक सूर्योदयदेखि आर्को सूर्योदय नभइन्जेलको काललाइ वैदिकहरुबाट सावनदिन भनिएको छ। [सोमयागको सोमसवनका लागि गनिने एक दिन भएको हुनाले सावन-दिन भनिएको हो। मूल वैदिक परम्परामा

अहोरात्रविभागेषु अहश् चाऽऽद्यं प्रकीर्तितम्।
अहान्यस्तमयाऽन्तानि उदयाऽन्ता च शर्वरी ॥३॥

प्रातःकालः सङ्गवश् च मध्याह्नश् चाऽपराह्णकः।
सायाह्नश् चेति भागाः स्युस् तुल्यमाना दिनस्य च ॥४॥

पूर्वाह्णश् चाऽथ मध्याह्नोऽपराह्ण इति वा त्रयः।
समानमाना भागाः स्युर् दिने ह्यन्वर्थनामकाः ॥५॥

त्रिंशन्मुहूर्तोऽहोरात्रः पक्षस् ते दश पञ्च च।
पक्षौ पूर्वाऽपरौ शुक्ल-कृष्णौ मासस् तु तावुभौ ॥६॥

चन्द्रस्याऽदर्शनाच् चैव यावदन्यददर्शनम्।
मासश् चन्द्रमितस् तस्य पक्षौ द्वौ शुक्लकृष्णकौ ॥७॥

शुक्ले पक्षे तथा कृष्णे पक्षयोरुभयोरपि।
दिनानि प्रथमाऽऽद्यानि तिथयस् ताः प्रकीर्तिताः ॥८॥

---

१ सावनदिन भन्नु र १ तिथि भन्नु सामान्यतया एउटै कुरा हुन्छ]॥२॥

रात-दिनको विभागमा दिन पैलो बताइएको छ (रात दोस्रो बताइएको छ)। सूर्य अस्ताउँदा दिन समाप्त हुन्छ, सूर्य उदाउँदा रात समाप्त हुन्छ (द्र.– महाभारत, आश्वमेधिकपर्व ४४।१८) [नारिका रुम देखिने गरि उज्यालो भएपछि दिनको प्रारम्भ मानिन्छ, रातको १२ बजे मिति (डेट) फेरिने र वार फेरिने कुरा पनि वैदिक धार्मिक कृत्यमा मान्य हुँदैन]॥३॥

प्रातःकाल, सङ्गव, मध्याह्न, अपराह्ण, सायाह्न इ पाँचोडा दिनका सूर्योदयदेखि सूर्यास्तसम्मको कालका बराबर रूपमा लगाइएका पाँच भाग हुन् [दिनका इ पाँच भाग वेददेखि नै प्रसिद्ध छन्]॥४॥

पूर्वाह्ण, मध्याह्न र अपराह्ण इ तिनोडा दिनका बराबर रूपमा लगाइएका सार्थक नाम भएका भाग हुन्॥५॥

तिस मुहूर्तहरुको एक अहोरात्र हुन्छ, अर्थात् एक रात-दिनमा (एक सूर्योदयदेखि आर्को सूर्योदयसम्ममा) तिस मुहूर्त हुन्छन्। [मुहूर्तरूप काल वेदैदेखि प्रसिद्ध छ]। १५ अहोरात्रको एक पक्ष हुन्छ। [यो प्रायिक कुरा हो, वर्षदिनका २४ पक्षमध्ये प्रायः ६ पक्षचाइँ १४ अहोरात्रका हुन्छन्।] पूर्वपक्ष शुक्लपक्ष हो, अपरपक्ष कृष्णपक्ष हो। ति दुवै पक्षको एक (चान्द्र) मैना हुन्छ [वेददेखि अमरकोशसम्म देखिने एस कुराले वैदिक परम्परामा मैना मुख्य रूपमा अमान्तरूपमा नै चान्द्र नै लिइने कुरा प्रष्ट हुन्छ]॥६॥

चन्द्रमाको एक अदर्शनदेखि (एक अम्सि गएदेखि) आर्को अदर्शन-सम्म (आर्को अम्सिसम्म) एउटा चान्द्रमास भनिन्छ। तेसका शुक्लपक्ष र कृष्णपक्ष हुन्छन्। शुक्लपक्षमा र कृष्णपक्षमा दुवै पक्षमा प्रथम-द्वितीय-तृतीयादि जो दिन हुन्छन् ति तिथि भनिएका छन्। [वैदिक परम्परामा शुक्लपक्षमा सँधै १५ दिन नै हुन्छन्, कृष्णपक्षमा कैलेकैले चतुर्दशी टुटेर

प्रतिपच् च द्वितीया च तृतीया च चतुर्थ्यपि।
पञ्चमी चैव षष्ठी च सप्तमी चाऽष्टमी ततः ॥९॥
नवमी दशमी चैकादशी च द्वादशी तथा।
त्रयोदशी चाऽथ चतुर्दश्यथो पौर्णमास्यमे ॥१०॥
उभयोः पक्षयोरन्तौ पञ्चदश्यौ प्रकीर्तिति।
उक्तं तत् पर्व प्रतिपत्पञ्चदश्योर् यदन्तरम् ॥११॥

नामानुसारं च शुभाऽशुभाः प्रतिपदादयः।
नन्दा भद्रा जया रिक्ता पूर्णा च तिथयः क्रमात् ॥१२॥
करणानि कौस्तुभं च बवं बालव-कौलवे।
तैतिलं च गराजिर् वा-णिजं विष्टिर् बवादिकम् ॥१३॥
क्रमाच् शुक्लप्रतिपदस् तिथ्यर्धेषु भवन्ति हि।
कृष्णाऽन्ते शकुनिश् चतुष्-पदं च नागमेव च ॥१४॥

---

१४ दिन मत्रै हुञ्छन्। शुक्लपक्षका प्रतिपदादि तिथिलाइ र कृष्णपक्षका प्रतिपदादि तिथिलाइ पनि पात्रामा १,२,३ इत्यादि रूपमा लेख्ने चलन छ। पूर्णिमालाइ १५ भनेर जनाउने चलन छ भने अम्सिलाइ ३० भनेर जनाउने चलन छ। चल्तिका पात्रामा तिथिका घडिपला पनि लेखिएका हुञ्छन्। वैदिक धर्ममा भने तिथि एक सूर्योदयदेखि आर्को सूर्योदयसम्म अखण्ड रूपमा नै मानिञ्छन्, घडिपलाको विचार हुँदैन] ॥७-८॥

तिथिहरुमा प्रतिपदा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी, अष्टमी, नवमी, दशमी, एकादशी, द्वादशी, त्रयोदशी, चतुर्दशी, पूर्णिमा इ शुक्लपक्षका तिथि हुन्, प्रतिपदा, द्वितीया, तृतीया, चतुर्थी .... अमावास्या इ कृष्णपक्षका तिथि हुन्॥९-१०॥

दुवै पक्षका अन्तिम तिथि पञ्चदशी पनि भनिएका छन्, पञ्च-दशीको र प्रतिपदाको अन्तराललाइ (जोर्निलाइ) पर्व भनिएको छ॥११॥

नामअन्सार शुभ र अशुभ हुने प्रतिपदादि तिथि क्रमैले नन्दा, भद्रा, जया, रिक्ता र पूर्णा भनिञ्छन् (नन्दा=१,६,११; भद्रा=२,७,१२; जया=३,८, १३; रिक्ता=४,९,१४; पूर्णा=५,१०,१५/३०)॥१२॥

तिथिको आदालाइ करण भञ्छन्। करण शुक्लपक्षका प्रतिपदादेखि क्रमैले तिथिको आदा-आदामा कौस्तुभ (किंस्तुघ्न), बव, बालव, कौलव, तैतिल, गराजि (गर), वाणिज (वणिक्), विष्टि, बव, बालव ... इत्यादि रूपले आउँछन्, कृष्णपक्षका अन्त्यमा तिन तिथ्यर्धहरुमा क्रमैले शकुनि, चतुष्पद र नाग करण हुञ्छन्। [इ करणको आथर्वणज्योतिषमा उल्लेख छ। हरिवंशमा, चरकसंहितामा, सुश्रुतसंहितामा र भरतनाट्यशास्त्रमा तथा आश्वलायनगृह्यसूत्रपरिशिष्टमा पनि करणको उल्लेख छ। करण तिथिकै आदाभाग भएकाले तिथिबाटै गतार्थ हुने हुँदा धर्मकृत्यका सङ्कल्पमा इनको उल्लेख नगरे पनि हुने देखिञ्छ। तथापि हेमाद्रिले महासङ्कल्पमा करणको

नक्षत्राणि कृत्तिकाश् च रोहिणी मृगशीर्षकम्।
आर्द्रा पुनर्वसू पुष्यस् ततोऽश्लेषा मघास् तथा ॥१५॥
पूर्वफल्गुन्यौ च फल्गुन्यौ तथैवोत्तरे अपि।
हस्तश् चित्रा च स्वातिश् च विशाखे चाऽनुराधिकाः ॥१६॥

उल्लेख हुने कुरा देखाएकाले याँहाँ पनि इनको उल्लेख गरिएको हो। करणको सजिलोसित ज्ञान गर्न करणचक्र तल दिइएको छ]॥१३-१४॥

नक्षत्रहरु (१) कृत्तिका, (२) रोहिणी, (३) मृगशीर्ष, (४) आर्द्रा, (५) पुनर्वसु, (६) पुष्य (तिष्य), (७) अश्लेषा, (८) मघा, (९) पूर्वफल्गुनी, (१०) उत्तरफल्गुनी, (११) हस्त, (१२) चित्रा, (१३) स्वाति, (१४) विशाखा, (१५) अनुराधा, (१६) ज्येष्ठा, (१७) मूल, (१८) पूर्वाषाढा, (१९) उत्तराषाढा, (२०) श्रवण, (२१) धनिष्ठा, (२२) शतभिषक्, (२३) पूर्वभद्रपद, (२४) उत्तरभद्रपद, (२५) रेवती, (२६) अश्वयुक्, (२७) अपभरणी (भरणी) हुन्।

[ऐले लोकमा अश्विनी, भरणी, कृत्तिका इत्यादि गणना चलेको भए पनि वेदमा, वेदाङ्गज्योतिषमा, याज्ञवल्क्यस्मृतिमा र कतिपय पुराणहरुमा समेत कृत्तिकादि नक्षत्रगणना देखिएकाले याँहाँ कृत्तिकादि गणना दिइएको हो। सङ्कल्पमा नक्षत्रको वचन र विभक्ति मिलाउँदा 'कृत्तिकासु नक्षत्रे', 'रोहिण्यां नक्षत्रे' इत्यादि भन्नपर्छ। तसर्थ कृत्तिकासु, रोहिण्याम्,

ज्येष्ठा मूलञ् च पूर्वाश् चाऽषाढास् ता उत्तरा अपि।
श्रवणश् च श्रविष्ठाश् च ततश् शतभिषक् परः ॥१७॥
पूर्वभद्रपदे चैवोत्तरभद्रपदे अपि।
रेवत्यश्वयुजौ चाऽपभरण्यश् चाऽप्यनुक्रमात् ॥१८॥
यत्राऽहोरात्रके यस्य नक्षत्रस्य तु सन्निधौ।
भवेच् चन्द्रस् तस्य तद् धि नक्षत्रमिति कथ्यते ॥१९॥

